ORIENTAL INSTITUTE, BARODA

Acc. No. 24430 Subject वेदान्त

Name विवेकचूडामणिः

Author शंकराचार्य

Age S'aka 1747 Extent fols 27+1=28

Language Sanskrit Script Devanagari

Source G. S. Patwardhan, Baroda Cost Gift

ORIENTAL INSTITUTE
Tilak Road, Post Box No. 75,
BARODA.

24430

श्रीमंत रा. रा. शंकरराव गंगाधर
बडोदें
शास्त्री पटवर्धन

॥ श्रीशंकराचार्यविरचितविवेकचूडामणि ॥

ORIENTAL INSTITUTE
Tilak Road, Post Box No. 75,
BARODA.

Gift to Oriental Institute
Manuscripts Section
From G. S. Patwardhan
Baroda

श्री

# श्रीशंकराचार्यकृत विवेकचूडामणि

श्रीगणपतयेनमः श्रीशंकराचार्यविवेकचूडामणिः स
र्ववेदांतसिद्धांतगोचरंतमगोचरं गोविंदंपरमानंदंस
द्गुरुंप्रणतोस्म्यहं १ जंतूनांनरजन्मदुर्लभमतःपुंस्त्वं
ततोविप्रतातस्माद्वैदिकधर्ममार्गपरताविद्वत्वमस्मात्प
रं आत्मानात्मविवेचनंस्वानुभवोब्रह्मात्मनासंस्थिति
र्मुक्तिर्नोशतकोटिजन्मसुकृतैःपुण्यैर्विनालभ्यते २
दुर्लभंत्रयमेवैतद्देवानुग्रहहेतुकं मनुष्यत्वंमुमुक्षुत्वंम
हापुरुषसंश्रयः ३ लब्ध्वाकथंचिन्नरजन्मदुर्लभंतत्रा
पिपुंस्त्वंश्रुतिपारदर्शनं यस्त्वात्ममुक्त्यैनयतेतमूढ
धीःसआत्महास्वंविनिहंत्यसद्ग्रहात् ४ इतःकोन्वस्ति
मूढात्मायस्तुस्वार्थेप्रमाद्यति दुर्लभंमानुषंदेहंप्राप्य
तत्रापिपौरुषं ५ पठंतुशास्त्राणियजंतुदेवान्कुर्वंतु
कर्माणिभजंतुदेवताः आत्मैक्यबोधेनविनापिमुक्ति
र्नसिध्यतिब्रह्मशतांतरेपि ६ अमृतत्वस्यनाशोस्ति
वित्तेनेत्येवहिश्रुतिः ब्रवीतिकर्मणोमुक्तेरहेतुत्वंस्फुटं
यतः ७ अतोविमुक्त्यैप्रयतेतविद्वान्संन्यस्तबाह्यार्थ
सुखस्पृहःसन् संतंमहांतंसमुपेत्यदेशिकंतेनोप
दिष्टार्थसमाहितात्मा ८ उद्धरेदात्मनात्मानंमग्नंसं

सारवारिधौ योगारूढत्वमासाद्यसम्यक्दर्शननिष्ठ
या ९ सन्यस्यसर्वकर्माणिभवबंधविमुक्तये यत्यतांपं
डितैर्धीरैरात्माभ्यासमुपस्थितैः १० चित्तस्यशुद्धयेक
र्मनतुवस्तूपलब्धये वस्तुसिद्धिर्विचारेणनकिंचित्कर्म
कोटिभिः ११ सम्यग्विचारतःसिद्धारज्जुतत्वावधारणा
भ्रांत्योदितमहासर्पभयदुःखविनाशिनी १२ अर्थस्य
निश्चयोदृष्टोविचारेणहितोक्तितः नस्नानेननदाने
नप्राणायामशतेनवा १३ अधिकारिणमाशास्तेफल
सिद्धिर्विशेषतः उपायादेशकालाद्याःसंत्यस्मिन्सह
कारिणः १४ अतोविचारःकर्तव्योजिज्ञासोरात्मव
स्तुनः समासाद्यदयासिंधुंगुरुंब्रह्मविदुत्तमं १५
मेधावीपुरुषोविद्वानूहापोहविचक्षणः अधिकार्यात्म
विद्यायामुक्तलक्षणलक्षितः १६ विवेकिनोविरक्तस्य
शमादिगुणशालिनः मुमुक्षोरेवहिब्रह्मजिज्ञासायो
ग्यतामता १७ साधनान्यत्रचत्वारिकथितानिमहर्षि
भिः येषुसत्स्वेवसन्निष्ठायदभावेनसिध्यति १८ आ
दौनित्यानित्यवस्तुविवेकःपरिगण्यते इहामुत्रफ
लभोगविरागस्तदनंतरं १९ शमादिषट्कसंपत्तिर्मु

मुक्षुत्वमितिस्फुटं ब्रह्मसत्यंजगन्मिथ्येत्येवंरूपोविनि
श्चयः २० सोयंनित्यानित्यवस्तुविवेकः समुदाहृतः।
तद्वैराग्यंजुगुप्सायांदर्शनश्रवणादिभिः २१ देहादि
ब्रह्मपर्यंतेह्यनित्येभोग्यवस्तुनि विरज्येद्विषयव्राता
द्दोषदृष्ट्यामुहुर्मुहुः २२ स्वलक्ष्येनियतावस्थामनसः
शमउच्यते विषयेभ्यःपरावृत्यास्थापनंस्वस्वगोलके २३
उभयेषामिंद्रियाणांसदमःपरिकीर्त्तितः बाह्यानालंब
नंवृत्तेरेषोपरतिरुत्तमा २४ सहनंसर्वदुःखानामप्रती
कारपूर्वकं चिंताविलापरहितंसातितिक्षानिगद्यते २५
शास्त्रस्यगुरुवाक्यस्यसत्यबुध्यावधारणं साश्रद्धाकथि
तासद्भिर्ययावस्तूपलभ्यते २६ सर्वदास्थापनंबुद्धेःशु
द्धेब्रह्मणिसर्वदा तत्समाधानमित्युक्तंनतुचित्तस्यलाल
नं २७ अहंकारादिदेहांतान्बंधाज्ञानकल्पितान्
स्वस्वरूपावबोधेनमोक्तुमिच्छामुमुक्षुता २८ मंदमध्या
दिरूपाणिवैराग्येणशमादिना प्रसादेनगुरोःसेयंप्रवृ
द्धासूयतेफलं २९ वैराग्यंचमुमुक्षुत्वंतीव्रंयस्यतुविद्य
ते तस्मिन्नेवार्थवंतस्युःफलवंतःशमादयः ३० एतयो
र्मंदितायत्रविरक्तत्वमुमुक्षुयोः मरौसलिलवत्तत्रश
मादेर्भानमात्रता ३१ मोक्षकारणसामग्र्यांभक्तिरेवग

रीयसी स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते ३२
उक्तसाधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः उपसीदेद्गुरुं
प्राज्ञं यस्माद्बंधविमोक्षणं ३३ श्रोत्रियोऽवृजिनोऽकाम
हतो यो ब्रह्मवित्तमः ब्रह्मण्युपरतः शांतो निरिंधन इ
वानलः ३४ अहेतुकदयासिंधुर्बंधुरानमतां सतां
तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः ३५ प्रसन्नं
तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः
स्वामिन्नमस्ते नतलोकबंधो का
रुण्यसिंधो पतितं भवाब्धौ मामुद्धरात्मीयकटाक्ष
दृष्ट्या ऋज्व्यातिकारुण्यसुधाभिवृष्ट्या ३६ दुर्वारसं
सारदवाग्नितप्तं दोधूयमानं दुरदृष्टवातैः भीतं प्रपं
नं परिपाहि मृत्योः शरण्यमन्यं यदहं न जाने ३७ शां
ता महांतो निवसंति संतो वसंतवल्लोकहितं चरंतः ती
र्णाः स्वयं भीमभवार्णवं ते पुनश्च तेऽन्यानपि तारयंतः ३८
अयं स्वभावः स्वत एव यत्परश्रमापनोदप्रवणं महात्म
नां सुधांशुरेषः स्वयमर्ककर्कशप्रभाभितप्तामवति
क्षितिं किल ३९ श्रीशिष्यउवाच ब्रह्मानंदरसानुभूति
कलितैः पूतैः सुशीतैः सितैर्युष्मद्वाक्कलशोज्झितैर
तिसुखैर्वाक्यामृतैः सेचय संतप्तं भवतापदावदहन ५

ज्वालाभिरेनंप्रसोधन्यास्तेभवदीक्षणक्षणगतेःपात्री
कृताःस्वीकृताः ४० कथंतरेयंभवसिंधुमेतंकावागति
र्मेकतमोस्त्युपायः जानेनकिंचित्कृपयावमांप्रभोसंसा
रदुःखक्षितिमातनुष्व ४१ तथावदंतंशरणागतंस्वंसं
सारदावानलतापतप्तं निरीक्ष्यकारुण्यरसार्द्रदृष्ट्यादद्या
दभीतिंसहसामहात्मा ४२ विद्वान्सतस्माउपसत्तिमी
युषेमुमुक्षवेसाधुयथोक्तकारिणे प्रशांतचित्तायशमान्वि
तायतत्वोपदेशंकृपयैवकुर्यात् ४३ गुरुरुवाच माभै
ष्टविद्वंस्तवनास्त्यपायःसंसारसिंधोस्तरणेस्त्युपायः
येनैवयातायतयोस्यपारंतमेवमार्गंतवनिर्दिशामि ४४
अस्त्युपायोमहान्कश्चित्संसारभयनाशकः तेनतीर्त्वा
भवांभोधिंपरमानंदमेष्यसि ४५ वेदांतार्थविचारेणजा
यतेज्ञानमुत्तमं तेनात्यंतिकसंसारदुःखनाशोभवत्य
नु ४६ श्रद्धाभक्तिज्ञानयोगान्मुमुक्षोर्मुक्तेर्हेतून्वक्तिसा
क्षाच्छ्रुतेर्गीः योवाएतेष्ववतिष्ठत्यमुष्यमोक्षोविद्याकल्पि
ताद्देहबंधात् ४७ अज्ञानयोगात्परमात्मनस्तवह्यना
त्मबंधस्ततएवसंसृतिः तयोर्विवेकोदितबोधवह्निरज्ञा
नकार्यंप्रदहेत्समूलं ४८ शिष्यउवाच कृपयाश्रूयतां
स्वामिन्प्रश्नोयंक्रियतेमया यदुत्तरमहंश्रुत्वाकृतार्थ
स्यांभवन्मुखात् ४९ कोनामबंधःकथमेषआगतः

ORIENTAL INSTITUTE
Tilak Road, Post Box No. 75,
BAROD[illegible]

कथंप्रतिष्ठास्यकथंविमोक्षणं कोसावनात्मापरमः कआ
त्मातयोर्विवेकः कथमेवउच्यते ५० गुरुरुवाच धन्योसि
कृतकृत्योसिपावितंतेकुलंत्वया यदविद्याबंधमुक्त्याब्रह्मी
भवितुमिछसि ५१ ऋणमोचनकर्तारः पितुः संतिसुता
दयः बंधमोचनकर्त्तातुस्वस्मादन्योनकश्चन ५२ मस्तक
न्यस्तभारादेर्दुःखमन्यैर्निवार्यते क्षुद्व्याधिकृतदुःखंतु
विनास्वेननकेनचित् ५३ पथ्यमौषधसेवाचक्रियतेये
नरोगिणा आरोग्यसिद्धिर्दृष्टास्यानान्यानुष्ठितकर्मणा॥
॥५४ वस्तुस्वरूपंस्फुटबोधचक्षुषास्वेनैववेद्यंनतुपंडिते
न चंद्रस्वरूपंनिजचक्षुषैवज्ञातव्यमन्यैरवगम्यतेकिं ५५
अविद्याकामकर्मादिपाशबंधंविमोचितुं कःशक्नुयाद्विना
त्मानंकल्पकोटिशतैरपि ५६ नयोगेननसांख्येनकर्मणा
नोन्यविद्यया ब्रह्मात्मैकत्वबोधेनमोक्षःसिध्यतिनान्य
था ५७ वीणायारूपसौंदर्यंतंत्रीवादनसौष्टवं प्रजारं
जनमात्रंतन्नसांम्राज्यायकल्पते ५८ वाग्वैखरीशब्द
शय्याशास्त्रव्याख्यानकौशलं वैदुष्यंविदुषस्तद्वद्भुक्त
येनतुमुक्तये ५९ अविज्ञातेपरेतत्वेशास्त्राधीतिस्तुनि
ष्फला विज्ञातेपिपरेतत्वेशास्त्राधीतिस्तुनिष्फला ६०
शब्दजालंमहारण्यंचित्तभ्रमणकारणं अतःप्रयत्नाज्ज्ञा
तव्यंतत्वज्ञात्तत्वमात्मनः ६१ अज्ञानसर्पदष्टस्यब्रह्मज्ञा

नौषधंविना किमुवेदैश्चशास्त्रैश्चकिमुमंत्रैःकिमौषधैः
॥६२ नगछतिविनापानंव्याधिरौषधशब्दतः विनापरो
क्षानुभवंब्रह्मशब्दैर्नमुच्यते ६३ अकृत्वाशत्रुसंहारम
गत्वाखिलभूश्रियं राजाहमितिशब्दान्नोराजाभवितु
मर्हति ६४ अकृत्वादृश्यविलयमज्ञात्वातत्वमात्मनः
बाह्यशब्दैःकुतोमुक्तिरुक्तिमात्रफलेनृणां ६५ आप्तोक्तिं
खननंतथोपरिशिलापाकर्षणंस्वकृतिर्निक्षेपःसमवेक्ष्य
तेनहिबहिःशब्दैस्तुनिर्गछति तद्ब्रह्मविदोपदेशमन
नध्यानादिभिर्लभ्यतेमायाकार्यतिरोहितंस्वममलंतत्वंन
दुर्युक्तिभिः ६६ तस्मात्सर्वप्रयत्नेनभवबंधविमुक्तये स्वै
रेवयत्नःकर्त्तव्योरोगादाविवपंडितैः ६७ यस्त्वयाद्यकृ
तःप्रश्नोवरीयान्छास्त्रविन्मतः सूत्रप्रायोनिगूढार्थो
ज्ञातव्यश्चमुमुक्षुभिः ६८ शृणुष्वावहितोविद्वान्यन्म
यासमुदीर्यते तमेतछ्रवणात्सद्योभवबंधाद्विमोक्ष्य
से ६९ मोक्षस्यहेतुःप्रथमोनिगद्यतेवैराग्यमत्यंतम
नित्यवस्तुषु तथाशमश्चापिदमस्तितिक्षान्यासःप्रस
क्ताखिलकर्मणांभृशं ७० ततःश्रुतिस्तन्मननंसत
त्वंध्यानंचिरंनित्यनिरंतरंमुनेः ततोविकल्पंपरमेत्य
विद्वानिहैवनिर्वाणसुखंसमृछति ७१ यद्बोद्धव्यं
तवेदानीमात्मानात्मविवेचनं तदुच्यतेमयासम्यकुश्रु

त्वात्त्वमवधारय ७२ मज्जास्थिमेदःफलरक्तचर्म
त्वगाह्वयैर्धातुभिरेभिरन्वितं पादोरूवक्षोभुजपृष्ठमस्त
कैरंगैरुपांगैरुपयुक्तमेतत् ७३ अहंममेतिप्रथितं
शरीरंमोहास्पदंस्थूलमितीर्यतेबुधैः नभोनभस्वद्
हनांबुभूमयःसूक्ष्माणिभूतानिभवंतितानि ७४ पर
स्परांशैर्मिलितानिभूत्वास्थूलानिचस्थूलशरीरहेत
वः मात्रास्तदीयाविषयाभवंतिशब्दादयःपंचसुखा
यभोक्तुः ७५ यएषुमूढाविषयेषुबद्धारागादिपाशेन
सुदुर्दमेन आयांतिनिर्यांत्यधऊर्ध्वमुच्चैःस्वकर्मदूतेनवि
कृष्यमाणाः ७६ शब्दादिभिःपंचभिरेवपंचपंचत्वमापुःस्व
भुजंग गुणेनबद्धाः कुरंगमातंगपतंगमीनभृंगानरःपंचभिरंचितः
किं ७७ दोषेणतीव्रोविषयःकृष्णसर्पविषादपि दृष्टमे
वविषंहंतिद्रष्टारंचक्षुषाप्ययं ७८ विषयाशामहापाशा
द्योविमुक्तःसुदुस्त्यजात् सएवकल्पतेमुक्त्यैनान्यःषट्
शास्त्रवेद्यपि ७९ आपातवैराग्यवतोमुमुक्षून्भवाब्धि
पारंप्रतियातुमुद्यतः आशाग्रहोमज्जयतेंतरालेनिगृ
ह्यकंठेविनिवर्त्यवेगात् ८० विषयाख्यग्रहोयेनसुविरक्त्य
सिनाहतः सगच्छतिभवांभोधेःपारंप्रत्यूहवर्जितः ८१
विषमविषयमार्गैर्गच्छतोनाच्छबुद्धेः प्रतिपदमभिघातो
मृत्युरप्यस्यसिद्धः हितसज्जनगुरूक्त्यागच्छतःस्वछ

बुधैः प्रभवति फलसिद्धिः सत्यमित्येव विधि ८२ मोक्षस्य
कांक्षा हृदि चेत्तवास्ति त्यज अतिदूराद्विषयान्विषं यथा पी
यूषवत्तोषदयाक्षमार्जवं प्रशांति दांति भज नित्यमादरात्
॥८३ अन्वीक्षणं यः परिहृत्य कृत्यमनाद्यविद्याकृतबंधमो
क्षणं देहः परार्थोयमनुष्यपोषणे यः सज्जते स स्वमनेन
हंति ८४ शरीरपोषणार्थी सन्य आत्मानं दिदृक्षति
ग्राहं दारुधिया धृत्वा नदीं तर्तुं स इच्छति ८५ मोह एव
महामृत्युर्मुमुक्षोर्वपुरादिषु मोहो विनिर्जितो येन स मु
क्तिपदमर्हति ८६ मोहं जहि महामृत्युं देहदारसुतादि
षु यं जित्वा मुनयो यांति तद्विष्णोः परमं पदं ८७ त्वङ्मां
सरुधिरस्नायुमेदोमज्जास्थिसंकुलं पूर्णं मूत्रपुरीषाभ्यां
स्थूलं निंद्यमिदं वपुः ८८ पंचीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः
पूर्वकर्मणा समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ८९
अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः ९९ बाह्ये
द्रियैः स्थूलपदार्थसेवां स्रक्चंदनस्त्र्यादिविचित्ररूपां
करोति जीवः स्वयमेतदात्मना तस्मात्प्रशस्तिर्वपुषोस्य जा
गरे ९० सर्वोपि बाह्यः संसारः पुरुषस्य यदाश्रयः विद्धि
देहमिमं स्थूलं गृहवद्गृहमेधिनः ९१ स्थूलस्य संभव
जरामरणानि धर्माः स्थौल्यादयोपि च गुणाः शिशुताद्य
वस्थाः वर्णाश्रमादिनियमा विविधामयाश्च पूजावमान
बहुमानमुखा विशेषाः ९२ बुद्धींद्रियाणि श्रवणं त्वगक्ष

श्रीमंत रा. रा. शंकरराव गंगाधर बडोदे शास्त्री पटवर्धन

क्षूघ्राणंचजिह्वाविषयावबोधात् वाक्पाणिपादौगुद
मप्युपस्थः कर्मेंद्रियाणि प्रवणानिकर्मे ९३ निगद्यतेंतः
करणंमनोधीरहंकृतिश्चित्तमितिस्ववृत्तिभिः मनस्तुसं
कल्पविकल्पकादिभिर्बुद्धिः पदार्थाध्यवसायधर्मतः ९४
अत्राभिमानादहमित्यहंकृतिः स्वार्थानुसंधानगुणेनचि
त्तं ९४ प्राणापानव्यानोदानसमानाभवत्यसौप्राणः स्व
यमेववृत्तिभेदात्सुवर्णसलिलादिवत् ९५ वागादिपंच
श्रवणादिपंचप्राणादिपंचाभ्रमुखानिपंच बुध्यादिवि
द्यापिचकामकर्मणि पुर्यष्टकंसूक्ष्मशरीरमाहुः ९६ इदं
इदंशरीरंशृणुसूक्ष्मसंज्ञितंलिंगंत्वपंचीकृतभूतसंभवं॥
सवासनंकर्मफलानुभावकंस्वाज्ञानतोपाधिरनादिरा
त्मनः ९७ स्वप्नोभवत्यस्यविभक्त्यवस्थास्वमात्रशेषेण
विभातियत्र स्वप्नेतुबुध्धिः स्वयमेवजाग्रत्कालीननाना
विधवासनाभिः ९८ कर्त्रादिभावंप्रतिपद्यतेनयत्रस्व
यंज्योतिरयंपरात्मा धीमात्रकोपाधिरशेषसाक्षीनलिप्य
तेतत्कृतकर्मलेपैः ९९ यस्मादसंगस्ततएवकर्मभिर्न
लिप्यतेकिंचिदुपाधिनाकृतैः सर्वव्यापृतिकरणंलिंग
मिदंस्याच्चिदात्मनःपुंसः वास्यादिकमिवतक्ष्णस्तेने
वात्माभवत्यसंगोयं १०० अंधत्वमंदत्वपटुत्वधर्माः
सौगुण्यवैगुण्यवशाद्धिचक्षुषः बाधिर्यमूकत्वमुखा
स्तथैवश्रोत्रादिधर्मानतुवेत्तुरात्मनः १ उछ्वासनिश्वा

सविजृंभणक्षुत्स्पंदनाद्युत्क्रमणादिकाः क्रियाः प्राणा
दिकर्माणिवदंतितज्ज्ञाः प्राणस्यधर्मावशनापिपासे २
अंतःकरणमेतेषुचक्षुरादिषुवर्ष्मणि अहमित्यभिमानेनति
ष्ठत्याभासतेजसा ३ अहंकारः सविज्ञेयः कर्ताभोक्ताभिमा
न्ययं सत्वादिगुणयोगेनावस्थात्रितयमश्नुते ४ विषयाणामा
नुकूल्येसुखीदुःखीविपर्यये सुखंदुःखंचतद्धर्मःसदानंद
स्यनात्मनः ५ आत्मार्थत्वेनहिप्रेयोविषयोनस्वतःप्रियः
स्वतएवहिसर्वेषामात्माप्रियतमोयतः ६ ततआत्मासदानं
दोनास्यदुःखंकदाचन यत्सुषुप्तौनिर्विषयआत्मानंदोनुभू
यते श्रुतिःप्रत्यक्षमैतिह्यमनुमानंचजाग्रति ७ अव्यक्तना
म्नीपरमेशशक्तिरनाद्यविद्यात्रिगुणात्मिकापरा कार्यानुमेया
सुधियैवमायाययाजगत्सर्वमिदंप्रसूयते ८ सन्नाप्यसन्ना
प्युभयात्मिकानोभिन्नाप्यभिन्नाप्युभयात्मिकानो संगाप्य
संगाप्युभयात्मिकानोमहाद्भुतानिर्वचनीयरूपा ९ शुद्धा
द्वयब्रह्मविबोधनाश्यासर्पभ्रमोरज्जुविवेकतोयथा रजः
स्तमःसत्वमितिप्रसिद्धागुणास्तदीयाःप्रथितैःस्वकार्यैः १०
विक्षेपशक्तीरजसःक्रियात्मिकायतःप्रवृत्तिःप्रसृतापुराणी॥
रागादयोस्याःप्रभवंतिनित्यंदुःखादयोयेमनसोविकाराः ११
कामःक्रोधोलोभदंभाभ्यसूयाहंकारेर्षामत्सराद्यास्तुघोराः॥
धर्माएतेराजसाःपुंप्रवृत्तिर्यस्मादेषातद्रजोबंधहेतुः १२
एषावृत्तिर्नामतमोगुणस्यशक्तिर्ययावस्त्ववभासतेन्यथा सै
षानिदानंपुरुषस्यसंसृतेर्विक्षेपशक्तेःप्रवणस्यहेतुः १३ प्र

ज्ञावानपिपंडितोपिचतुरोप्यत्यंतसूक्ष्मार्थदृग्व्यालीढस्तम
सानवेत्तिबहुधासंबोधितोपिस्फुटं भ्रांत्यारोपितमेवसाधु
कलयत्यालंबतेतद्गुणान्हंतासौप्रबलादुरंततमसःशक्ति
र्महत्यावृतिः १४ आभावनावाविपरीतभावनासंभावना
विप्रतिपत्तिरन्याः संसर्गयुक्तंनविमुंचतिध्रुवंविक्षेपशक्तिः
क्षपयेत्यजस्रं १५ अज्ञानमूलत्वजडत्वनिद्राप्रमादमूढत्व
मुखास्तमोगुणाः यैःसंप्रयुक्तोनतुवेत्तिकिंचिन्निद्रालुव
त्स्तंभवदेवतिष्ठति १६ सत्वंतुशुद्धंजलवत्तथापिताभ्यांमिलि
त्वासरणायकल्पते यत्रात्मबिंबःप्रतिबिंबितःसन्प्रकाश
यत्यर्कइवाखिलंजलं १७ मिश्रस्यसत्वस्यभवंतिधर्मास्त्व
मानिताद्यानियमायमाद्याः श्रद्धाचभक्तिश्चमुमुक्षुताचदैवी
चसंपत्तिरसंनिवृत्तिः १८ विशुद्धसत्वस्यगुणाःप्रसादःस्वा
त्मानुभूतिःपरमाप्रशांतिः तृप्तिःप्रहर्षःपरमात्मनिष्ठाय
यासदानंदरसंसमृच्छति १९ अव्यक्तमेतत्त्रिगुणैर्निरुक्तं
तत्कारणंनामशरीरमात्मनः सुषुप्तिरेतस्यविभक्त्यवस्था
य प्रलीनसर्वेंद्रियबुद्धिवृत्तिः २० सर्वप्रकारःप्रमितिप्रशांति
र्बीजात्मनावस्थितिरेवबुद्धेः सुषुप्तिरत्रास्यकिलप्रतीतिः
किंचिन्नवेद्मीतिजगत्प्रसिद्धेः २१ देहेंद्रियप्राणमनोहमा
दयःसर्वेविकाराविषयाःसुखादयः व्योमादिभूतान्यखि
लंचविश्वमव्यक्तपर्यंतमिदंह्यनात्मा २२ मायाकल्पितमा
याकार्यंसर्वंमहदादिदेहपर्यंतं असदिदमनात्मतत्त्वंविद्धि
मरुमरीचिकाकल्पं २३ अथतेसंप्रवक्ष्यामिस्वरूपंपरमात्म

नः यद्विज्ञायनरोबंधान्मुक्तः कैवल्यमश्नुते २४ अस्तिकि
चित्स्वयंनित्यमहंप्रत्ययलंबनः अवस्थात्रयसाक्षीसन्पंच
कोशविलक्षणः २५ योविजानातिसकलंजाग्रत्स्वप्नसुषु
प्तिषु बुधितद्वृत्तिसद्भावमभावमहमित्ययं २६ यःपश्यति
स्वयंसर्वंयंनपश्यतिकश्चन यश्चेतयतिबुध्यादिनतद्यं
तयत्ययं २७ येनविश्वमिदंव्याप्तंयंनव्याप्नोतिकश्चन
भासरूपमिदंसर्वंयंभांतमनुभातीदं २८ यस्यसंनिधिमात्रे
णदेहेंद्रियमनोधियः विषयेषुस्वकीयेषुवर्तंतेप्रेरिताइ
व २९ अहंकारादिदेहांताविषयाश्चसुखादयः वेद्यंतेघ
टवेद्येननित्यबोधस्वरूपिणा ३० एषोंतरात्मापुरुषःपु
राणोनिरंतराखंडसुखानुभूतिः सदैकरूपःप्रतिबोध
मात्रोयेनेषितावागसवश्चरंति ३१ अत्रैवसत्वात्मनिधी
गुहायामव्याकृताकाशउरुप्रकाशः आकाशउच्चैरवि
वत्प्रकाशितेस्वतेजसासर्वमिदंप्रकाशयत् ३२ ज्ञाता
मनोहंकृतिविक्रियाणांदेहेंद्रियप्राणकृतक्रियाणां
अयोग्निवत्तामनुवर्तमानोनचेष्टतेनोपिकरोतिकिंच
न ३३ नजायतेनम्रियतेनवर्धतेनक्षीयतेनोविकारो
तिनित्यः विलीयमानेपिचपुष्पमुष्मिन्नलीयतेकुंभ
इवांबरंस्वयं ३४ प्रकृतिविकृतिभिन्नःशुद्धबोधःस्व
भावःसदसदिदमशेषंभासयंनिर्विशेषः विलसति

परमात्माजाग्रदादिष्ववस्थास्वहमहमितिसाक्षात्साक्षि
रूपेणबुद्धेः ३५ नियमितमनसामुंत्वंस्वमात्मानमात्म
न्ययमहमितिसाक्षाद्विद्धिबुद्धिप्रसादात् जनिमरणतरंगा
पारसंसारसिंधुंप्रतरभवकृतार्थोब्रह्मरूपेणसंस्थः ३६ अ
त्रानात्मन्यहमितिमतिर्बंधएषोस्यपुंसः प्राप्ताज्ञानाज्जन
नमरणक्लेशसंपातहेतुः येनैवायंवपुरिदमसत्सत्यमित्या
त्मबुद्ध्यापुष्यत्युक्षत्यवतिविषयैस्तंतुभिः कोशकृद्वत् ३७
अतस्मिंस्तद्बुद्धिः प्रभवतिविमूढस्यतमसाविवेकाभावाद्वै
स्फुरतिभुजगेरज्जुधिषणा यतोनर्थव्रातोनिपततिसमा
दातुरधिकस्ततोयोसद्ग्राहः सहिभवतिबंधः शृणुसखे ३८
त अखंडनित्याव्ययबोधशक्त्यास्फुरंतमात्मानमनंतवैभवं स
मावृणोत्यावृतिशक्तिरेषातमोमयीराहुरिवार्कबिंबं ३९
तिरोभूतेस्वात्मन्यमलतरतेजोवतिपुमाननात्मानंमोहा
दहमितिशरीरंकलयति ततः कामक्रोधप्रभृतिभिरमुं
बंधककृगुणैः स्वयंविक्षेपाख्यारजसउरुशक्तिर्व्यथयति ४०
महामोहग्राहग्रसनगलितात्मावगमनोधियोनानावस्था
स्वयमभिनयस्तद्गुणतया अपारेसंसारेविषयविषपू
रेजलनिधौनिमज्ज्योन्मज्ज्यायंभ्रमतिकुमतिः कुत्सित
गतिः ४१ भानुप्रभासंजनिताभ्रपंक्तिर्भानुंतिरोधायय
थाविजृंभते आत्मोदिताहंकृतिरात्मतत्त्वंतथातिरोधा
यविजृंभतेस्वयं ४२ कवलितदिननाथेदुर्दिनेसांद्र

मेघेव्यथयतिहिमजंस्रावायुरुग्रोयथैतान् अविरततमसात्मन्यावृत्तेमूढबुधिंक्षपयतिबहुदुःखैस्तीव्रविक्षेपशक्तिः ४३ एताभ्यामेवशक्तिभ्यांबंधःपुंसःसमागतः॥
याभ्यांविमोहितोदेहंमत्वात्मानंभ्रमत्ययं ४४ बीजंसंसृतिभूमिजस्यतुतमोदेहात्मधिरंकुरोरागःपल्लवमंबुकर्मतु
वपुःस्कंधोसवःशाखिकाः अग्राणींद्रियसंहतिश्चविषयाःपुष्पाणिदुःखंफलंनानाकर्मसमुद्भवंबहुविधंभोक्तात्रजीवःखगः ४५ अज्ञानमूलोयमनात्मबंधोनैसर्गिकोनादिरनंत
ईरितः जन्माप्ययव्याधिजरादिदुःखप्रवाहपातंजनयत्यमुष्य ४६ नास्त्रैर्नशस्त्रैरनिलेनवह्निनाछेत्तुंनशक्योनचकर्मकोटिभिः विवेकविज्ञानमहासिनाविनाधातुःप्रसादेन
शितेनमंजुना ४७ श्रुतिप्रमाणैकमतेस्वधर्मनिष्ठातयैवात्मविशुद्धिरस्य विशुद्धबुधेःपरमात्मवेदनंतेनैवसंसारसमूलनाशः ४८ कोशैरन्नमयाद्यैःपंचभिरात्मानसंवृतोभाति निजशक्तिसमुत्पन्नैःशैवलपटलैरिवांबुवापीस्थं ४९ तच्छैवालापनयेसम्यक्सलिलंप्रतीयतेशुद्धं॥
तृषासंतापहरंसद्यःसौख्यप्रदंपरंपुंसः ५० पंचानामपिकोशानामपवादेविभात्ययंशुद्धः नित्यानंदैकरसःप्रत्यग्रूपःपरस्वयंज्योतिः ५१ आत्मानात्मविवेकःकरणीयोबंधमुक्तयेविदुषा तेनैवानंदीभवतिस्वयंविज्ञायसच्चिदानंदं ५२ मुंजादिषीकामिवदृश्यवर्गात्प्रत्यंचमात्मानमसं

गमक्रियं विविच्यतत्रप्रविलाप्यसर्वंतदात्मनातिष्ठति
यःसमुक्तः ५३ देहोयमन्नभवनोन्नमयस्तुकोशोह्यन्ने
नजीवतिविनश्यतितद्विहीनः त्वकुचर्ममांसरुधिरास्थि
पुरीषराशिर्नायंस्वयंभवितुमर्हतिनित्यशुधः ५४ पूर्व
जनेरपिमृतेरथनायमस्तिजातक्षणक्षणगुणोनियुतः
स्वभावः नैकोजडश्चघटवत्परिदृश्यमानःस्वात्माक
थंभवतिभावविकारहेतुः ५५ पाणिपादादिमान्देहो
नात्माव्यंगेपिजीवनात् तत्तच्छक्तेरनाशाच्चननियम्योनि
यामकः ५६ देहतधर्मतत्कर्मतदवस्थादिसाक्षिणः
सतएवस्वतःसिद्धंतद्वैलक्षण्यमात्मनः ५७ शल्यरा
शिर्मांसलिप्तोमलपूर्णोतिकश्मलः कथंभवेदयंवेत्ता
स्वयमेतद्विलक्षणः ५८ त्वङ्मांसमेदोस्थिपुरीषराशा
वहंमतिंमूढजनःकरोति विलक्षणंवेत्तिविचारशीलो
निजस्वरूपंपरमार्थरूपं ५९ देहोहमित्येवजडस्यबु
धिर्देहेचजीवेविदुषस्त्वहंधीः विवेकविज्ञानवतोम
हात्मनोब्रह्माहमित्येवमतिःसदात्मनि ६० अत्रात्म
बुधिंत्यजमूढबुधेत्वङ्मांसमेदोस्थिपुरीषराशौ स
र्वात्मनिब्रह्मणिनिर्विकल्पेकुरुष्वशांतिंपरमांभज
स्व ६१ देहेंद्रियादावसतिभ्रमोदितांविद्वानहंतां
नजहातियावत् तावन्नतस्यास्तिविमुक्तिवार्ताप्य
स्त्वेववेदांतनयांतदर्शी ६२ छायाशरीरेप्रतिबिंब
गात्रेयत्स्वप्नदेहेहृदिकल्पितांगे यथात्मबुधिस्तव
नास्तिकाचिद्देहेशवेस्मिंश्चतथेवमास्तु ६३ देहा

देहात्मधीरेवनृणामसिद्धियांजन्मादिदुःखप्रभव
स्यबीजं यतस्ततस्त्वंजहितांप्रयत्नात्त्यक्तेतुचित्तेन
पुनर्भवाशा ६४ कर्मेंद्रियैःपंचभिरंचितोयंप्राणोभ
वेत्प्राणमयस्तुकोशः येनात्मवानन्नमयोनुपूर्णःप्रव
र्ततेसौसकलक्रियासु ६५ नैवात्मापिप्राणमयोवा
युविकारोगंतागंतावायुवदंतर्बहिरेषः यस्मात्किंचि
त्क्वापिनवेत्तीष्टमनिष्टंस्वंवान्यंवाकिंचननित्यपरतंत्रः॥
॥६६ ज्ञानेंद्रियाणिचमनश्चमनोमयःस्यात्कोशो
ममायमितिवस्तुविकल्पहेतुः संज्ञादिभेदकलना
कलितोबलीयांस्तत्पूर्वकोशमनुपूर्वविजृंभतेयः ६७
पंचेंद्रियैःपंचभिरेवहोतृभिःप्रतीयमानोविषया
ज्यधारया जाज्वल्यमानोबहुवासनेंधनैर्मनोमयो
ग्निर्दहतिप्रपंचं ६८ नह्यस्त्यविद्यामनसोतिरिक्ता
मनोह्यविद्याभवबंधहेतुः तस्मिन्विनष्टेसकलंवि
नष्टंविजृंभितेतस्मिन्सकलंविजृंभितं ६९ स्वप्नेर्थ
शून्येसृजतिस्वशक्त्याभोक्त्रादिविश्वंमनएवस
र्वं तथैवजाग्रत्यपिनोविशेषस्तत्सर्वमेतन्मनसोवि
जृंभणं ७० सुषुप्तिकालेमनसिप्रलीनेनैवास्ति
किंचित्सकलप्रसिद्धेः अतोमनःकल्पितएवपुंसः
संसारएतस्यनवस्तुतोस्ति ७१ वायुनानीयते
मेघःपुनस्तेनैवनीयते मनसाकल्प्यताबंधोमो
क्षस्तेनैवकल्प्यते ७२ देहादिसर्वविषयेपरिकल्प्य

रागंबध्नातितेनपुरुषंपशुवद्गुणेन वैरस्यमत्रविषवत्सुवि
धायपश्चादेनंविमोचयतितन्मनएवबंधात् ७३ तस्मा
न्मनःकारणमस्यजंतोर्बंधस्यमोक्षस्यचवाविधाने
बंधस्यहेतुर्मलिनंरजोगुणैर्मोक्षस्यहेतुर्विरजोतम
स्कं ७४ विवेकवैराग्यगुणातिरेकाच्छुद्धत्वमासाद्यम
नोविमुक्त्यै भवत्यतोबुद्धिमतोमुमुक्षोस्ताभ्यांदृढा
भ्यांभवितव्यमग्रे ७५ मनोनाममहाव्याघ्रोविषयारण्य
भूमिषु चरत्यत्रनगच्छंतुसाधवोयेमुमुक्षवः ७६ मनः
प्रसूतेविषयानशेषान्स्थूलात्मनासूक्ष्मतयाचभोक्तुं॥
शरीरवर्णाश्रमजातिभेदान्गुणक्रियाहेतुफलानिनित्यं॥
॥७७ असंगचिद्रूपममुंविमोह्यदेहेंद्रियप्राणगुणैर्निब
ध्य अहंममेतिभ्रमयत्यजस्रंमनःस्वकृत्येषुफलेषुभुक्
क्तिषु ७८ अध्यासदोषात्पुरुषस्यसंसृतिरध्यासबंध
स्त्वमुनैवकल्पितः रजस्तमोदोषवतोविवेकिनोजन्मा
दिदुःखस्यनिदानमेतत् ७९ अतःप्राहुर्मनोविद्यांप
डितास्तत्त्वदर्शिनः येनैवभ्राम्यतेविश्वंवायुनेवाभ्र
मंडलं ८० तन्मनःशोधनंकार्यंप्रयत्नेनमुमुक्षुणा
विशुद्धेसतिचैतस्मिन्मुक्तिःकरफलायते ८१ मोक्षै
कसक्त्याविषयेषुरागंनिर्मूल्यसंन्यस्यचसर्वकर्म
सच्छ्रद्धयायःश्रवणादिनिष्ठोरजस्स्वभावंसधुनोतिबु
द्धेः ८२ मनोमयोनापिभवेत्परात्माह्याद्यंतवत्त्वात्परि
णामिभावात् दुःखात्मकत्वाद्विषयत्वहेतोर्द्रष्टाहिदृ
श्यात्मतयानदृष्टः ८३ बुद्धिर्बुद्धींद्रियैःसार्धंसवृत

कर्तृलक्षणः विज्ञानमयकोशस्यात्पुंसः संसारकारणं
॥८४ अनुव्रजच्चित्प्रतिबिंबशक्तिर्विज्ञानसंज्ञः प्रकृते
र्विकारः ज्ञानक्रियावानहमित्यजस्रं देहेंद्रियादिष्वभि
मन्यतेभ्रमं ८५ अनादिकालोयमहंस्वभावोजीवः स
मस्तव्यवहारवोढा करोतिकर्माण्यनुपूर्ववासनः पुण्या
न्यपुण्यानिचतत्फलानि ८६ भुंक्तेविचित्रास्वपियोनि
षुव्रजन्नायातिनिर्यात्यधऊर्ध्वमेषः अस्यैवविज्ञानम
यस्यजाग्रत्स्वप्नाद्यवस्थाः सुखदुःखभोगः ८७ देहादि
निष्ठाश्रमधर्मकर्मगुणाभिमानः सततंममेति विज्ञान
कोशोयमतिप्रकाशः प्रकृष्टसांनिध्यवशात्परात्मनः ८८
अतोभवेदेषउपाधिरस्ययदात्मधीः संसरतिभ्रमेण
योयंविज्ञानमयः प्राणेषुहृदिस्फुरन्स्वयंज्योतिः कूटस्थः
सन्नात्माकर्ताभोक्ताभवेदुपाधिस्थः ८९ स्वयंपरि
च्छेदमुपेत्यबुद्धेस्तादात्म्यदोषेणपरंमृषात्मनः सर्वात्म
कः संनपिवीक्षतेस्वंस्वतः पृथक्त्वेनमृदोघटानिव ९०
उपाधिसांनिध्यवशात्परात्माप्युपाधिधर्माननुभाति
तद्गुणः अयोविकारान्नविकारिवह्निवत्सदैकरूपो
पिपरस्वभावात् ९१ शिष्यउवाच भ्रमेणाप्यन्यथा
वस्तुजीवभावः परात्मनः तदुपाधेरनादित्वान्नाना
देर्नाशयिष्यते ९२ अतोस्यजीवभावोपिनित्योभव
तिसंसृतिः ननिवर्तेततन्मोक्षः कथंमेश्रीगुरोवद
॥९३ गुरुरुवाच सम्यक्पृष्टंत्वयाविद्वन्सावधा

नेनतच्छृणु प्रमाणिकानस्पवतिभ्रांत्यामोहितकल्पना॥
॥९४ भ्रांतिंविनात्वसंगस्यनिष्क्रियस्यनिराकृतेः न
घटेत्तीर्थसंबंधोनभसोनीलतादिवत् ९५ स्वस्यदृ
ष्टुर्निर्गुणस्याक्रियस्यप्रत्यग्बोधानंदरूपस्यबुद्धेः
भ्रांत्याप्राप्तोजीवभावोनसत्योमोहापायेनास्त्यवस्तु
स्वभावात् ९६ यावत्भ्रांतिस्तावदेवास्यसत्तामिथ्याज्ञा
नोज्जृंभितस्यप्रमादात् रज्ज्वांसर्पोभ्रांतिकालीनएव
भ्रांतेर्नाशेनैवसर्पोस्तितद्वत् ९७ अनादित्वमविद्या
याःकार्यस्यापितथेष्यते उत्पन्नायांतुविद्यायामावि
द्यकमनाद्यपि ९८ प्रबोधेस्वप्नवत्सर्वंसहमूलंवि
नश्यति अनाद्यपिचतत्सर्वंप्राग्भाववदस्फुटं ९९
अनादेरपिविध्वंसःप्राग्भावस्यविवीक्षितः यद्बुद्ध्यु
पाधिसंबंधात्परिकल्पितमात्मनि १०० जीवत्वंन
ततोन्यंतुस्वरूपेणविलक्षणः संबंधस्त्वात्मनोबु
द्ध्यामिथ्याज्ञानपुरःसरः १ विनिवृत्तिर्भवेत्तस्यस
म्यग्ज्ञानेननान्यथा ब्रह्मात्मैकत्वविज्ञानंसम्यग्ज्ञा
नंश्रुतेर्मतं २ तदात्मानात्मनोःसम्यग्विवेकेनैवसि
ध्यति ततोविवेकःकर्तव्यःप्रत्यगात्मासदात्मनो॥
॥३ जलंपंकवदत्यंतंपंकापायेजलंस्फुटं ३ अस
न्निवृत्तौतुसदात्मनःस्फुटप्रतीतिरेतस्यभवेत्प्रती
चः ततोनिरासःकरणीयएवसदात्मनःसाध्वह
मादिवस्तुनः ४ अतोनायंपरात्मास्यात्विज्ञान

मयशब्दभाक् विकारित्वाजडत्वाच्चपरिच्छिन्नत्वहेतुतः ॥
॥५ दृश्यत्वाद्व्यभिचारित्वान्नानित्योनित्यइष्यते आनंद
प्रतिबिंबचुंबिततनुर्वृत्तिस्तमोज्जृंभितास्यादानंदमयः प्रि
यादिगुणकः स्वेष्टार्थलाभोदयः पुण्यस्यानुभवेविभाति
कृतिनामानंदरूपः स्वयंभूत्वानंदतियत्रसाधुतनुभृन्मा
त्रः प्रयासंविना ६ आनंदमयकोशस्यसुषुप्तौस्फूर्तिरु
त्कटा स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ७ नैवाय
मानंदमयः परात्मासोपाधिकत्वात्प्रकृतेर्विकारात् का
र्यत्वहेतुः सुकृतक्रियायाविकारसंघातसमाहितत्वात् ॥
॥८ पंचानामपिकोशानांनिषेधेयुक्तितः कृते तन्निषे
धावधिः साक्षी बोधरूपोवशिष्यते ९ योयमात्मास्व
यंज्योतिः पंचकोशविलक्षणः अवस्थात्रयसाक्षीसन्
निर्विकारोनिरंजनः १० सदानंदः सविज्ञेयः स्वात्मत्वे
नविपश्चिता शिष्यउवाच मिथ्यात्वेननिषिद्धेषुकोशे
ष्वेतेषुपंचसु सर्वाभावंविनाकिंचिन्नपश्याम्यत्रहेगुरो ॥
विज्ञेयंकिमुवस्त्वस्तिस्वात्मानात्रविपश्चिता ११ श्री
गुरुरुवाच सत्यमुक्तंत्वयाविद्वन्निपुणोसिविचार
णे अहमादिविकारास्तेतदभावोयमप्यथा १२
सर्वेयेनानुभूयंतेयः स्वयंनानुभूयते तमात्मानंवेदि
तारंविद्धिबुध्यासुसूक्ष्मया १३ तत्साक्षिकंभवेत्तत्त
द्यद्यद्येनानुभूयते कस्याप्यननुभूतार्थेसाक्षित्वंनो
पयुज्यते १४ असौस्वसाक्षिकोभावोयतः स्वेनानु

भूयते अतः परंस्वयंसाक्षात्प्रत्यगात्मानचेतरः १५ जा
ग्रत्स्वप्नसुषुप्तिषुस्फुटतरंयोसौसमुज्जृंभतेप्रत्यग्रूपत
यासदाहमहमित्यंतस्फुरन्नेकधा नानाकारविकारभा
जिनइमान्पश्यन्नहंधीमुखान्नित्यानंदचिदात्मनास्फुर
तितंविधित्स्वमेवंहृदि १६ घटोदकेबिंबितमर्कबिंबमा
लोक्यमूढोरविमेवमन्यते तथाचिदाभासमुपाधिसं
स्थंभ्रांत्याहमित्येवजडोभिमन्यते १७ घटंजलंतगतम
र्कबिंबंविहायसर्वंविनिवीक्ष्यतेर्कः तटस्थितस्तत्त्रित
यावभासकःस्वयंप्रकाशोविदुषायथातथा १८ देहं
धियंचित्प्रतिबिंबमेतंविसृज्यबुद्धौनिहितंगुहायां
द्रष्टारमात्मानमखंडबोधंसर्वप्रकाशंसदसद्विलक्षणं॥
॥१९ नित्यंविभुंसर्वगतंसुसूक्ष्ममंतर्बहिःशून्यमनन्यमा
त्मनः विज्ञायसम्यग्निजतत्त्वमेतत्पुमान्विपाप्मावि
जराविमृत्युः २० विशोकआनंदघनोविपश्चित्स्वयंकु
तश्चिन्नबिभेतिकश्चित् नान्योस्तिपंथाभवबंधमुक्ते
र्विनास्वतत्त्वानुगमंमुमुक्षोः २१ ब्रह्माभिन्नत्वविज्ञा
नंभवमोक्षस्यकारणं येनाद्वितीयमानंदब्रह्मसंपद्य
तेबुधः २२ ब्रह्मभूतस्तुसंसृत्यैविद्वान्नावर्त्ततेपुनः
गू विज्ञातव्यमतःसम्यग्ब्रह्माभिन्नत्वमात्मनः २३ सत्यं
ज्ञानमनंतंब्रह्मविशुद्धंपरंस्वतःसिद्धं नित्यानंदैकर
संप्रत्यगभिन्नंनिरंजनंजयति २४ सद्विदंपरमाद्वैतंस
स्मादन्यस्यवस्तुनोभावात् नह्यदन्यस्तिकिंचित्सम्य दू

कूपरतत्वबोधदशायां २५ यदिदंसकलंविश्वंनानारू
पंप्रतीतमज्ञानात् तत्सर्वंब्रह्मैवप्रत्यस्ताशेषभावनादो
षं २६ मृत्कार्यभूतापिमृदोनभिन्नःकुंभोस्तिसर्वत्र
मृत्स्वरूपात् नकुंभरूपंपृथगस्तिकुंभःकुतोमृषाक
ल्पितनाममात्रः २७ केनापिमृत्तद्भिन्नतयास्वरूपं
घटस्यसंदर्शयितुंनशक्यते अतोघटःकल्पितएव
मोहान्मृदेवसत्यंपरमार्थभूता २८ सद्ब्रह्मकार्यंसक
लंसदेवसन्मात्रमेतन्नततोन्यदस्ति अस्तीतियोव
क्तिनतस्यमोहोविनिर्गतोसनिद्रितवत्प्रजल्पतः २९
ब्रह्मैवेदंविश्वमित्येववाणीश्रौतीब्रूतेथर्वनिष्ठाव
रिष्ठा तस्मात्सर्वंब्रह्ममात्रंहिविश्वंस्वाधिष्ठानाभि
न्नताशोपितस्य ३० सत्यंयदिस्याज्जगदेतदात्मनो
नतत्वहानिर्निगमाप्रमाणता असत्यवादित्वमपी
शितुस्यान्नेतत्त्रयंसाधुहितंमहात्मनां ३१ ईश्वरो
वस्तुतत्वज्ञोनचाहंतेष्ववस्थितः नचमत्स्थानिभू
तानीत्येवमेवव्यचीकथत् ३२ यदिसत्यंभवेद्वि
श्वंसुषुप्तावुपलभ्यतां यन्नोपलभ्यतेकिंचिदतो
सत्स्वप्नवन्मृषा ३३ अतःपृथङ्नास्तिजगत्परा
त्मनःपृथक्प्रतीतिस्तुमृषागुणेलवत् आरोपि
तस्यास्तिकिमर्थवत्ताधिष्ठानमाभातितथाभ्र
मेण ३४ भ्रांतस्ययद्भ्रममतःप्रतीतंब्रह्मैवतत्त
द्रजतंहिशुक्तिः इदंतयाब्रह्मसदैवरूप्यतेत्वा
रोपितंब्रह्मणिनाममात्रं ३५ अतःपरंब्रह्मसद

श्रीमंत रा. रा. शंकरराव गंगाधर
बडोदें
शास्त्री पटवर्धन

द्वितीयंविशुद्धंयद्विज्ञानघनंनिरंजनं प्रशांतमाद्यंत
विहीनमक्रियंनिरंतरानंदरसस्वरूपं ३६ निरस्तमा
याकृतसर्वभेदंनित्यंध्रुवंनिष्कलमप्रमेयं अरूपमव्य
क्तमनाख्यमव्ययंज्योतिःस्वयंकिंचिदिदंचकास्ति ३७
शा ज्ञातृज्ञानज्ञेयशून्यमनंतंनिर्विकल्पकं केवलाखं
डचिन्मात्रंपरंतत्त्वंविदुर्बुधाः ३८ अहेयमनुपादेयं
मनोवाचामगोचरं अप्रमेयमनाद्यंतंब्रह्मपूर्णमहं
महः ३९ तत्त्वंपदाभ्यामभिधीयमानयोर्ब्रह्मात्मनोः
शोधितयोर्यदीत्थं श्रुत्यातयोस्तत्त्वमसीतिसम्यगे
कत्वमेवप्रतिपद्यतेमुहुः ४० ऐक्यंतयोर्लक्षितयो
र्नवाच्ययोर्निगद्यतेन्योन्यविरुद्धधर्मिणोः खद्योत
भान्वोरिवराजभृत्ययोःकूपांबुराश्योःपरमाणुमे
र्वोः ४१ तयोर्विरोधोयमुपाधिकल्पितोनवास्तवः
किंचिदुपाधिरेषः ईशस्यमायामहदादिकारणंजी
वस्यकार्यंतनुपंचकोशाः ४२ एतावुपाधीपरजी
वयोस्तयोःसम्यङ्निरासेनपरोनजीवः राज्यंनरें
द्रस्यभटस्यखेटस्तयोरपोहेनभटोनराजा ४३
अथातआदेशइतिश्रुतिःस्वयंनिषेधतिब्रह्मणिक
ल्पितंद्वयं श्रुतिप्रमाणानुगृहीतयुक्त्यातयोर्निरा
सःकरणीयएवं ४४ नेदंनेदंकल्पितत्वान्नसत्यं
रज्जौदृष्टव्यालवत्स्वप्नवच्च इत्थंदृश्यंसाधुयुक्त्या
व्यपोह्यज्ञेयःपश्चादेकभावस्तयोर्यः ४५ ततस्तु
तौलक्षणयासुलक्ष्यौतयोरखंडैकरसत्वसिद्धये

नालंजहत्यानतथाजहत्याकिंतूभयार्थात्मिकयैवभा
व्यं ४६ सदेवदत्तोयमितीहचैकताविरुधधर्मांशमपा
स्यकथ्यते यथातथातत्वमसीतिवाक्येविरुधधर्मानुभ
यत्रहित्वा ४७ संलक्ष्यचिन्मात्रतयासदात्मनोरखंडभा
वः परचीयतेबुधैः एवंमहावाक्यशतेनकथ्यतेब्रह्मा
त्मनोरैक्यमखंडभावः ४८ अस्थूलमित्येतदसंनिरस्य
सिद्धंस्वतोव्योमवदप्रतर्क्यं अतोमृषामात्रमिदंप्रतीतं
जहीहियत्स्वात्मतयागृहीतं ४९ ब्रह्माहमित्येवविशुध
बुध्याविद्धिस्वमात्मानमखंडबोधं मृत्कार्यंसकलंघ
टादिसततंमृन्मात्रमेवाभितस्तद्वत्सज्जनितंसदात्मक
मिदंसन्मात्रमेवाखिलं यस्मान्नास्तिसतःपरंकिमपि
तत्सत्यंसआत्मास्वयंतस्मात्तत्वमसिप्रशांतममलंब्र
ह्माद्वयंयत्परं ५० निद्राकल्पितदेशकालविषयज्ञात्रा
दिसर्वंयथामिथ्यातद्वदिहापिजाग्रतिजगत्स्वाज्ञान
कार्यत्वतः यस्मादेवमिदंशरीरकरणप्राणाहमाद्य
प्यसत्तस्मात्तत्वमसिप्रशांतममलंब्रह्माद्वयंयत्परं ५१
जातिनीतिकुलगोत्रदूरगंनामरूपगुणदोषवर्जितं।
देशकालविषयातिवर्तियद्ब्रह्मतत्वमसिभावयात्म
नि ५२ यत्परंसकलवागगोचरंगोचरंविमलबोध
चक्षुषः शुद्धचिद्घनमनादिवस्तुयद्ब्रह्मतत्वमसि
भावयात्मनि ५३ षड्भिरूर्मिभिरयोगियोगिहृद्भा
वितंनकरणैर्विभावितं बुद्ध्यवेद्यमनवद्यमस्तियद्ब्र

ORIENTAL INSTITUTE
Tilak Road, Post Box No. 75.
BAROD .

स्नतत्वमसिभावयात्मनि ५४ भ्रांतिकल्पितजगत्क
लाश्रयंस्वाश्रयंचसरसद्विलक्षणं निष्कलंनिरूपमा
नवृद्धिमद्ब्रह्मतत्वमसिभावयात्मनि ५५ जन्मवृद्धि
परिणत्यपक्षयव्याधिनाशनविहीनमव्ययं विश्वसृ
ष्ट्य यवनघातकारणंब्रह्मतत्वमसिभावयात्मनि ५६
अस्तभेदमनपास्तलक्षणंनिस्तरंगजलराशिनिश्चलं
नित्यमुक्तमविभक्तमूर्तियद्ब्रह्मतत्वमसिभावयात्म
नि ५७ एकमेवसदनेककारणंकारणांतरनिरासका
रणं कार्यकारणविलक्षणंस्वयंब्रह्मतत्वमसिभाव
यात्मनि ५८ निर्विकल्पकमनल्पमक्षयंयत्क्षराक्षर
विलक्षणंवरं नित्यमद्वयसुखंनिरंजनंब्रह्मतत्वम
सिभावयात्मनि ५९ यद्विभातिसदनेकधाभ्रमान्ना
मरूपगुणविक्रियात्मना हेमवत्स्वयमविक्रियंस
दाब्रह्मतत्वमसिभावयात्मनि ६० यत्रकास्त्यनव
रंपरस्परं प्रत्यगेकरसमात्मलक्षणं सत्यचित्सुख
मनंतमद्वयंब्रह्मतत्वमसिभावयात्मनि ६१ उक्त
मर्थमिममात्मनिस्वयंभावयप्रथितयुक्तिभिर्धि
या संशयादिरहितंकराम्बुवत्तेनतत्वनिगमोभवि
ष्यसि ६२ स्वबोधमात्रंपरिशुद्धतत्वंविज्ञानसं
घनृपवत्प्रसन्न्ये तदात्मनैवात्मनिसर्वदास्थितोवि
लापयद्ब्रह्मणिदृश्यजातं ६३ बुधोगुहायांसद
सद्विलक्षणंब्रह्मास्तिसत्यंपरमद्वितीयं तदात्म
नायात्रवसन्गुहायांपुनर्नतस्यांगगुहाप्रवेशः ६४

श्रीजगन्मंगल ज्ञात्वेवस्कन्यपिबलवतीवासनानादि
रेषाकर्त्ताभोक्ताप्यहमितिदृढायस्यसंसारहेतुः प्र
त्यग्दृष्ट्यात्मनिनिवसतासापनेयाप्रयत्नान्मुक्तिंप्राहु
स्तदिहमुनयोवासनातानवंयत ६५ अहंममेतिया
भावोदेहाक्षादावनात्मनि अध्यासोयंनिरस्तव्योवि
दुषाब्रह्मनिष्ठया ६६ ज्ञात्वासंप्रत्यगात्मानंबुद्धितद्वृ
त्तिसाक्षिणं सोहमित्येवसद्वृत्यास्वान्यत्रात्ममतिंज
हि ६७ लोकानुवर्त्तनंत्यक्त्वात्यक्त्वादेहानुवर्त्तनं शा
स्त्रानुवर्त्तनंत्यक्त्वास्वाध्यासापनयंकुरु ६८ लोक
वासनयाजंतोःशास्त्रवासनयापिच देहवासनया
ज्ञानंयथावन्नैहजायते ६९ संसारकारागृहमोक्ष
मिच्छोरयोमयंपादनिबंधशृंखलं वदंतितज्ज्ञाःप
टुवासनात्रयंयस्माद्विमुक्तःसमुपैतिमुक्तिं ७०
जलादिसंपर्कवशात्प्रभूतदुर्गंधधूतागुरुदिव्यवा
सना संघर्षणेनैवविभातिसम्यक्विधूयमानेस
तिबाह्यगंधे ७१ अंतःस्थितानंतदुरंतवासनाधूली
विलिप्तापरमात्मवासना प्रज्ञातिसंघर्षणतोवि
शुद्धाप्रतीयतेचंदनगंधवत्स्फुटा ७२ अनात्मवा
सनाजालैस्तिरोभूतात्मवासना नि[illegible]त्मनिष्ठयाते
षांनाशेभातिस्वयंस्फुटा ७३ यथायथाप्रत्यगव
स्थितंमनस्तथातथामुंचतिबाह्यवासनाः निःशे
षमोक्षेसतिवासनानामात्मानुभूतिःप्रतिबंधशू स्या

न्या ७४ स्वात्मन्येवसदास्थित्यामनोनश्यतियोगिनः
वासनानांक्षयश्चातः स्वाध्यासापनयंकुरु ७५ तमो
द्वाभ्यांरजः सत्वात्सत्वंशुद्धेननश्यति तस्मात्सत्वमवष्ट
भ्यस्वाध्यासापनयंकुरु ७६ प्रारब्धंपुष्यतिवपुरिति
निश्चित्यनिश्चलः धैर्यमालंब्ययत्नेनस्वाध्यासापनं
कुरु ७७ नाहंजीवः परंब्रह्मेत्यतद्व्यावृत्तिपूर्वकं वास
नावेगतः प्राप्तस्वाध्यासा० ७८ श्रुत्यायुक्त्यास्वानुभूत्या
ज्ञात्वासार्वात्म्यमात्मनः क्वचिदाभासतः प्राप्तस्वाध्या० ७८
अंनदानविसर्गाभ्यामीषन्नास्तिक्रियामुने तदेकनिष्ठ
यानित्यंस्वाध्या० ७९ तत्वमस्यादिवाक्योत्थब्रह्मात्मैक
त्वबोधतः ब्रह्मण्यात्मत्वदार्ढ्यायस्वाध्या० ८० अहंभा
वस्यदेहेस्मिन्निःशेषविलयावधि सावधानेनयुक्तया
त्मास्वाध्या० ८१ प्रतीतिर्जीवजगतोः स्वप्नवद्भातियाव
ता तावन्निरंतरंविद्वन्स्वाध्या० ८२ निद्रायालोकवार्ता
याः शब्दादेरपिविस्मृतेः क्वचिन्नावसरंदत्वाचिंतयात्मा
नमात्मनि ८४ मातापित्रोर्मलोद्भूतंमलमांसमयंवपुः
त्यक्त्वाचांडालवद्दूरंब्रह्मीभूयाकृतीभव ८५ घटाकाशं
महाकाशइवात्मानंपरात्मनि विलाप्यखंडभावेनतूष्णी
भवसदामुने ८६ स्वप्रकाशमधिष्ठानंस्वयंभूयस
दात्मना ब्रह्मांडमपिपिंडांडंत्यज्यतांमलभांडवत् ८७
चिदात्मनिसदानंदेदेहारूढामहंधियं निवेश्यलिंग
मुत्सृज्यकेवलोभवसर्वदा ८८ यत्रैषजगदाभासो
दर्पणांतः पुरंयथा तद्ब्रह्माहमितिज्ञात्वाकृतकृत्यो

भविष्यसि १९ यत्सत्यभूतंनिजरूपमाद्यंचिदद्वयानंदम
रूपमव्ययं तदेत्यमिथ्यावपुरुत्सृजेत शैलूषवद्वेषमुपात्त
मात्मनः २० सर्वात्मनाविश्वमिदंमृषैवनैवाहमर्थः क्षणि
कत्वदर्शनात् जानाम्यहंसर्वमितिप्रतीतिःकुतोहमादेः
क्षणिकस्यसिध्येत् २१ अहंपदार्थस्त्वहमादिसाक्षीनित्यः
सुषुप्तावपिभावदर्शनात् ब्रूतेह्यजोनित्यइतिश्रुतिःस्वयंस
प्रत्यगात्मासदसद्विलक्षणः २२ विकारिणांसर्वविकारवे
त्तानित्योविकारोसवितुंसमर्हति मनोरथस्वप्नसुषुप्तिषु
स्फुटंपुनःपुनर्दृष्टमसत्त्वमेतयोः २३ अतोभिमानंत्यजमांस
पिंडेपिंडाभिमानिन्यपिबुद्धिकल्पिते कालत्रयाबाध्यमखंड
बोधंज्ञात्वास्वमात्मानमुपैहिशांतिं २४ त्यजाभिमानंकुलगो
त्रनामरूपाश्रमेष्वार्द्रशवाश्रितेषु लिंगस्यधर्मानपिकर्तृतादीं
स्त्यक्त्वाभवाखंडसुखस्वरूपः २४ संत्यन्येप्रतिबंधाःपुंसः
संसारहेतवोदृष्टाः तेषामेषांमूलंप्रथमविकारोभवत्यहंका
रः २५ यावत्स्यात्स्वस्यसंबंधोहंकारेणदुरात्मना तावन्नले
शमात्रापिमुक्तिवार्त्ताविलक्षणा २६ अहंकारग्रहान्मुक्तः
स्वरूपमुपपद्यते चंद्रवद्विमलःपूर्णःसदानंदःस्वयंप्रभः २७
यावापुरुषोहमितिप्रतीतोबुद्ध्याविक्लृप्तस्तमसातिमूढ
या तस्यैवनिःशेषतयाविनाशेब्रह्मात्मभावप्रतिबंधशू
न्यः २८ ब्रह्मानंदनिधिर्महाबलवताहंकारघोराहिना
संवेष्ट्यात्मनिरक्ष्यतेगुणमयैश्चंडैस्त्रिभिर्मस्तकैः विज्ञा
नाख्यमहासिनाद्युतिमताविच्छिद्यशीर्षत्रयंनिर्मूल्याहि
मिमंनिधिंसुखकरंधीरोनुभोक्तुंक्षमः २९ यावद्वायत्किं
चिद्विषदोषस्फूर्तिरस्तिचेद्देहे कथमारोग्यायभवेत्तद्

दहृतापियोगिनोमुक्तये ३०० अहमोत्यंतनिवृत्यातत्कृ
तनानाविकल्पसंहृत्या प्रत्यक्तत्वविवेकादयमहमस्मी
तिविंदतेतत्वं १ अहंकारकर्त्तर्यहमितिमतिंमुंचसहसा
विकारात्मन्यात्मप्रतिफलजुषिस्वस्थितिमुषि यदध्या
सात्प्राप्ताजनिमृतिजरादुःखबहुलाप्रतीचश्चिन्मूर्ते
स्तवसुखतनोःसंसृतिरियं २ सदैकरूपस्यचिदात्मनो
विभोरानंदमूर्त्तेरनवद्यकीर्त्तेः नैवान्यथाक्वाप्यविकारि
णस्तेविनाहमध्यासममुष्यसंसृतिः ३ तस्मादहंका
रमिमंस्वशत्रुंभोक्तुर्गलेकंटकवत्प्रतीतं विछिद्यविज्ञान
महासिनास्फुटंभुंक्ष्वात्मसाम्राज्यसुखंयथेष्टं ४ ततो
हमादेर्विनिवर्त्यवृत्तिंसत्यक्तरागःपरमार्थलाभात् तूष्णीं
समास्वात्मसुखानुभूत्यापूर्णात्मनिब्रह्मणिनिर्विकल्पः ५
समूलकृत्तोपिमहानहंपुनर्व्युल्लेखितःस्याद्यदिचेतसाक्षि
णं संजीव्यविक्षेपशतंकरोतिनभस्वताप्रावृषिवारिदो
यथा ६ निगृहीतशत्रोसहसावकाशः क्वचिंनदेयोवि
षयानुचिंतया सएवसंजीवनहेतुरस्यप्रक्षीणजंबीरत
रोरिवांबु ७ देहात्मनासंस्थितएवकामीविलक्षणः
कामयिताकथंस्यात् अतोर्थसंधानपरत्वमेवभेदप्र
सक्त्याभवबंधहेतुः ८ कार्यप्रवर्धनाद्बीजप्रवृद्धिःपरि
दृश्यते कार्यनाशाद्बीजनाशस्तस्मात्कार्यंनिरोध
येत् ९ वासनावृद्धितःकार्यंकार्यवृध्याचवासना वर्ध
तेसर्वदापुंसःसंसारोननिवर्त्तते १० संसारबंधविछि
त्यैतद्वयंप्रदहेद्यतिः वासनावृद्धिरेताभ्यांचिंतयाक्रि

यथाबहिः ११ ताभ्यांप्रवर्धमानासासूतेसंसृतिमात्म
नः त्रयाणांचक्षयोपायःसर्वावस्थासुसर्वदा १२ सर्वत्र
सर्वतःसर्वब्रह्ममात्रावलोकनं सद्भाववासनादार्ढ्या
तत्रयंलयमश्नुते १३ क्रियानाशाभवेच्चिंतानाशोस्माद्वा
सनाक्षयः वासनाप्रक्षयोमोक्षःसजीवन्मुक्तिरिष्यते १४
सद्वासनास्फूर्तिविजृंभणेसत्यसौविलीनात्वहमादि
वासना अतिप्रकृष्टाप्यरुणप्रभायांविलीयतेसाधुयथा
तमिस्रा १५ तमस्तमःकार्यमनर्थजालंनदृश्यतेसत्युदि
तेदिनेशे तथाद्वयानंदरसानुभूतौनैवास्तिबंधोनचदुः
खगंधः १६ दृश्यंप्रतीतंप्रविलापयन्स्वसन्मात्रमानंद
घनंविभावयन् समाहितःसन्बहिरंतरंवाकालंनय
थासतिकर्मबंधे १७ सनत्सुजातःधृतराष्ट्रंप्रति प्र
मादोब्रह्मनिष्ठायांनकर्तव्यःकदाचन॥प्रमादोमृत्यु
रित्याहभगवान्ब्रह्मणःसुतः १८ नप्रमादादनर्थोन्यो
ज्ञानिनःस्वस्वरूपतः ततोमोहस्ततोहंधीस्ततोबंध
स्ततोव्यथा १९ विषयाभिमुखंदृष्ट्वाविद्वांसमपिवि
स्मृतिः विक्षेपयतिधीदोषैर्योषाजारमिवप्रियं २०
यथापकृष्टंशैवालंक्षणमात्रंनतिष्ठति आवृणोति
तथामायाप्राज्ञंवापिपराङ्मुखं २१ लक्ष्यच्युतंचेत्ख
लुचित्तमीषद्बहिर्मुखंसन्निपातेततस्ततः प्रमादतः
प्रच्युतकेलिकंदुकः सोपानपंक्तौपतितोयथातथा २२
विषयेष्वाविशच्चेतःसंकल्पयतितद्गुणान् सम्यक्
कल्पनात्कामःकामात्पुंसःप्रवर्तनं २३ ततःस्वरूपविभ्रं

श्रीमंत रा. रा. शंकरराव ... बडोदें शास्त्री पटवर्धन

शोविभ्रष्टस्तलपतत्यथः पतितस्यविनानाशंपुनर्नारो
हइष्यते२ संकल्पंवर्जयेद्विद्वान्सर्वानर्थस्यकारणं २४
अतः प्रमादान्नपरोस्तिमृत्युर्विवेकिनोब्रह्मविदः समा
धौ समाहितः सिद्धिमुपैतिसम्यक्समाहितात्माभवसा
वधानः २५ जीवितोयस्यकैवल्यंविदेहेचसकेवलः
यत्किंचित्पश्यतोभेदं भयंब्रूतेयजुश्रुतिः २६ यदाकदा
वापिविपश्चिदेषब्रह्मण्यनंतेप्यणुमात्रभेदं पश्यत्यथा
मुष्यभयंतदेवयद्वीक्षितंभिन्नतयाप्रमादात् २७ श्रुति
स्मृतिन्यायशतैर्निषिद्धेदृश्येत्रयः स्वात्ममतिंकरोति।
उपैतिदुःखोपरिदुःखजातंनिषिद्धकर्त्तासमलिम्लुचे
यथा २८ सत्याभिसंधानरतोविमुक्तोमहत्त्वमात्मीय
मुपैतिनित्यं मिथ्याभिसंधानरतस्तुनश्येद्दृष्टंतदेतद
दचोरचोरयोः २९ यतिरसदनुसंधिंबंधहेतुंविहाय
स्वयमयमहमस्मीत्यात्मदृष्ट्यैवतिष्ठेत् सुखयतिन
नुनिष्ठाब्रह्मणिस्वानुभूत्याहरतिपरमविद्याकनदुः
खंप्रतीतं ३० बाह्यानुसंधिः परिवर्त्तयेत्फलंदुर्वासना
मेवततस्ततोधिकां ज्ञात्वाविवेकंपरिहृत्यबाह्यंस्वा
त्मानुसंधिंविदधीतनित्यं ३१ बाह्येनिरुद्धेमनसःप्र
सन्नतामनः प्रसादेपरमात्मदर्शनं तस्मिंस्सुदृष्टे
५ भवबंधनाशोबहिर्निरोधः पदवीविमुक्तेः ३२ कः
पंडितः सः सदसद्विवेकीश्रुतिप्रमाणः परमार्थ
दर्शी जानन्नकुर्यादसतोवलंबंस्वपातहेतोः शि
शुवन्मुमुक्षुः ३३ देहादिसंसक्तिमतोनमुक्तिर्मुक्त
स्यदेहाद्यभिमत्यभावः सुप्तस्यनोजागरणंनजाग्र

तः स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ३४ अंतर्बहिस्त्वं
स्थिरजंगमेषु ज्ञात्वात्मनाधारतया विलोक्य त्यक्ताखि
लोपाधिरखंडरूपः पूर्णात्मना यः स्थित एष मुक्तः ३५ स
र्वात्मना बंधविमुक्तिहेतुः सर्वात्मभावान्न परास्ति कश्चि
त् दृश्याग्रहे सत्युपपद्यतेसौ सर्वात्मभावोपि सदात्मनिष्ठ
या ३६ दृश्यस्याग्रहणं कथं नु घटते देहात्मना तिष्ठतो बा
ह्यार्थानुभवप्रसक्तमनसस्तत्तत्क्रियां कुर्वतः संन्यस्ताखि
लधर्मकर्मविषयैर्नित्यात्मनिष्ठापरैस्तत्त्वज्ञैः करणीयमा
त्मनि सदानंदेच्छुभिर्यत्नतः ३७ सर्वात्म्यसिद्धये भिक्षोः कृ
तश्रवणकर्मणः समाधिं विदधात्येषा शांतो दांत इति श्रुतिः ॥
॥३८ आरूढशक्तेरहमो विनाशः कर्तुं न शक्यः सहसापि
पंडितैः यैर्निर्विकल्पाख्यसमाधिनिश्चलास्तानंतरानंतभ
वा हि वासनाः ३९ अहंबुध्येव मोहिन्या योजयित्वावृतेर्ब
लात् विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः ४० वि
क्षेपशक्तिविजयो विषमो विधातुं निःशेषमावरण
शक्तिनिवृत्त्यभावे दृग्दृश्ययोः स्फुटपयोजलवद्विभा
गनस्येत्तदावरणमात्मनि च स्वभावात् ४१ निःसंशयेन
भवति प्रतिबंधशून्यो विक्षेपणं नहि तदा यदि चेन्मृषा
र्थे सम्यग्विवेकः स्फुटबोधजन्यो विभज्य दृग्दृश्यपदा
र्थतत्त्वं ४२ छिनत्ति मायाकृतमोहबंधं यस्माद्विमुक्त
स्य पुनर्न संसृतिः परावरैकत्वविवेकवह्निर्दहत्यवि
द्यागहनं ह्यशेषं किं स्यात्पुनः संसरणस्य बीजमद्वैत
भावं समुपेयुषोस्य ४३ आवरणस्य निवृत्तिर्भवति च
सम्यक्पदार्थदर्शनतः मिथ्याज्ञानविनाशस्तद्वि
क्षेपजनितदुःखनिवृत्तिः ४४ एतत्त्रितयं दृष्टं सम्य यं

रज्जुस्वरूपविज्ञानात् तस्माद्वस्तुसतत्वंज्ञातव्यंबं
धमुक्तयेविदुषा ४५ अयोग्नियोगादिवसत्समन्वया
त्मात्रादिरूपेणविजृंभतेधीः तत्कार्यमेतत्रितयंयतोमृ
षादृष्टंभ्रमस्वप्नमनोरथेषु ४६ अतोविकाराःप्रकृतेरहंमु
खादेहावसानाविषयाश्चसर्वे क्षणेन्यथाभाविनएषआ
त्मानोदेतिनाप्येतिकदापिनान्यथा ४७ नित्याद्वयाखंडचि
देकरूपोबुध्यादिसाक्षीसदसद्विलक्षणः अहंपदप्रत्यय
लक्षितार्थः प्रत्यक्सदानंदघनःपरात्मा ४८ इत्थंविपश्चि
त्सदसद्विभज्यनिश्चित्यतत्वंनिजबोधदृष्ट्या ज्ञात्वास्वमात्मा
नमखंडबोधंतेभ्योविमुक्तःस्वयमेवशाम्यति ४९ अज्ञान
हृदयग्रंथेर्निःशेषविलयस्तदा समाधिनाविकल्पेनयदा
द्वैतात्मदर्शनं ५० त्वमहमिदमितीयंकल्पनाबुद्धिदोषात्
प्रभवतिपरमात्मन्यद्वयेनिर्विशेषे प्रविलसदसमाधावस्य
सर्वोविकल्पोविलयनमुपगच्छेद्वस्तुतत्वावधृत्या ५१ शां
तोदांतःपरमुपरतःक्षांतियुक्तःसमाधिंकुर्वन्नित्यंकलयति
यतिःस्वस्यसर्वात्मभावं तेनाविद्यातिमिरजनितान्साधु
दग्ध्वाविकल्पान्ब्रह्माकृत्यानिवसतिसुखंनिष्क्रियोनिर्वि
कल्पः ५२ समाहितायेप्रविलाप्यबाह्यंश्रोत्रादिचेतःस्व
महंचिदात्मनि तएवमुक्ताभवपाशबंधैर्नान्येतुपारोक्ष्य
कथाभिधायिनः ५३ उपाधियोगात्स्वयमेवभिद्यतेचोपा
ध्यपोहेस्वयमेवकेवलः तस्मादुपाधेर्विलयायविद्वान्
वसेत्सदाकल्पसमाधिनिष्ठया ५४ सतिसक्तोनरोया
तिसद्भावंह्येकनिष्ठया कीटकोभ्रमरंध्यायन्भ्रमरत्वाय
कल्पते ५५ क्रियांतरासक्तिमपास्यकीटकोध्यायन्यथालिंह्यलि

साचमृच्छति तथैवयोगीपरमात्मतत्त्वंध्यात्वासमाया
तितदेकनिष्ठया ५६ अतीवसूक्ष्मंपरमात्मतत्त्वंनस्थू
लदृष्ट्याप्रतिपत्तुमर्हति समाधिनात्यंतसूक्ष्मवृत्त्या
ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ५७ यथासुवर्णपुटपा
कशोधितंत्यक्त्वामलंस्वात्मगुणंसमृच्छति तथामनः
सत्वरजस्तमोमलंध्यानेनसंत्यज्यसमेतितत्त्वं ५८ नि
रंतराभ्यासवशात्तदित्थंपक्वंमनोब्रह्मणिलीयतेयदा
तदासमाधिःसविकल्पवर्जितःस्वतोऽद्वयानंदरसानुभा
वकः ५९ समाधिनानेनसमस्तवासनाग्रंथेर्विनाशो
ऽखिलकर्मनाशः अंतर्बहिःसर्वतएवसर्वदास्वरूपविस्फू
र्तिरयत्नतःस्यात् ६० श्रुतेःशतगुणंविद्यान्मननंमनना
दपि निदिध्यासंलक्षगुणमनंतंनिर्विकल्पकं ६१ नि
र्विकल्पिकसमाधिनास्फुटंब्रह्मतत्त्वमवगम्यतेध्रुवं
नान्यथाचलतयामनोगतेःप्रत्ययांतरविमिश्रितंभवे
त् ६२ अतःसमाधत्स्वयतेंद्रियःसदानिरंतरंशांतम
नाःप्रतीचि विध्वंसयध्वांतमनाद्यविद्ययाकृतंसदेक
त्वविलोकनेन ६३ योगस्यप्रथमद्वारंवाङ्निरोधोऽप
रिग्रहः निराशाचनिरीहाचनित्यमेकांतशीलता ६४
एकांतस्थितिरिंद्रियोपरमणेहेतुर्दमश्चेतसः संरोधे
करणंशमेनविलयंयायादहंवासना तेनानंदरसानु
भूतिरचलाब्राह्मीसदायोगिनःतस्माच्चित्तनिरोधने
वसततंकार्यःप्रयत्नोमुने ६५ वाचंनियच्छात्मनितं
नियच्छबुद्धौधियंयच्छचबुद्धिसाक्षिणि तंचापिपूर्णा

त्मनिनिर्विकल्पेविलाप्यशांतिंपरमांभजस्व ६६ देहप्रा
णेंद्रियमनोबुध्यादिभिरुपाधिभिः यैर्यैर्वृत्तेःसमायोग
स्तत्तद्भावोस्ययोगिनः ६७ तंनिवृत्स्यमुनेःसम्यक्सर्वोपर
मणंसुखं दृश्यतेतेःसदानंदरसोनुभवविप्लवः ६८ अं
तस्त्यागोबहिस्त्यागोविरक्तस्यैवयुज्यते त्यजत्यंतर्बहिःसं
गंविरक्तस्यमुमुक्षया ६९ बहिःस्तुविषयःसंगंतथांतरहमा
दिभिः विरक्तएवशक्नोतित्यक्तुंब्रह्मणिनिष्ठितः ७० वैराग्य
बोधौपुरुषस्यपक्षिणःपक्षौविजानीहिविचक्षणत्वं विमु
क्तिसौधाग्रलताधिरोहणंताभ्यांविनानान्यतरेणसिध्यति॥
॥७१ अत्यंतवैराग्यवतःसमाधिःसमाहितस्यैवदृढप्रबो
धः प्रबुधतत्त्वस्यहिबंधमुक्तिर्मुक्तात्मनोनित्यसुखानुभू
तिः वैराग्यान्नपरंसुखस्यजनकंपश्यामिवश्यात्मनस्त
च्चेछुधतरात्मबोधसहितंस्वाराज्यसाम्राज्यधुक् एतद्दा
र[illegible]मुक्तियुवतेर्यस्मात्वमस्मात्परंसर्वत्रास्पृहयासदा
त्मनिसदाप्रज्ञांकुरुश्रेयसे ७३ आशांछिंधिविषोपमेषु
विषयेष्वेषैवमृत्योःसृतिस्त्यक्त्वाजातिकुलाश्रमेष्वभि
मतिंमुंचातिदूरात्क्रियाः देहादावसतींत्यजात्मधिषणांप्र
ज्ञांकुरुष्वात्मनित्वंद्रष्टास्यमनोसिनिर्द्वयपरंब्रह्मासिय
द्वस्तुतः ७४ लक्ष्येब्रह्मणिमानसंदृढतरंसंस्थाप्यबाह्ये
न्द्रियंस्वस्थानेविनिवेश्यनिश्चलतनुश्चोपेक्ष्यदेहस्थि
तिं ब्रह्मात्मत्वमुपेत्यतन्मयतयाचाखंडवृत्यानिशंब्र
ह्मानंदरसंपिबात्मनिमुदाशून्यैकिमन्यैर्भ्रमैः ७५
अनात्मचिंतनंत्यक्त्वाकश्मलंदुःखकारणं चिंतयात्मानमा

नदृरूपयन्मुक्तिकारणं ७६ एषःस्वयंज्योतिरशेषसाक्षी
विज्ञानकोशेविलसत्यजस्रं लक्ष्यंविधायैनमसद्विलक्ष
णमखंडवृत्यात्मतयानुभावय ७७ एतमच्छिन्नयावृत्या
प्रत्ययांतरशून्यया उल्लेखयन्विजानीयात्स्वस्वरूपतया
स्फुटं ७८ अत्रात्मत्वंदृढीकुर्वन्नहमादिषुसंत्यजन् उदा
सीनतयातेषुतिष्ठेद्घटपटादिवत् ७९ विशुद्धमंतःकरणं
स्वरूपेनिवेश्यसाक्षिण्यवबोधमात्रे शनैःशनैर्निश्चलता
मुपानयन्पूर्णत्वमेवानुविलोकयेत्ततः ८० देहेंद्रियप्राणम
नोहमादिभिःस्वज्ञानक्लृप्तैरखिलैरुपाधिभिः विमुक्तमा
त्मानमखंडरूपंपूर्णंमहाकाशमिवावलोकयेत् ८१ घट
कलशकुसूलसूचिमुख्यंगगनमुपाधिशतैर्विमुक्तमेकं ॥
भवतिनविविधंतथैवशुद्धंपरमहमादिविमुक्तमेकमेव ८२
ब्रह्मादिस्तंबपर्यंतामृषामात्राउपाधयः ततःपूर्णंस्वमा
त्मानंपश्येदेकात्मनास्थितं ८३ यत्रभ्रांत्याकल्पितंयद्वि
वेकेतत्तन्मात्रंनैवतस्माद्विभिन्नं भ्रांतेर्नाशेभ्रांतिदृष्टा
हितत्वंरज्जुस्तद्वद्विश्वमात्मस्वरूपं ८४ स्वयंब्रह्मास्व
यंविष्णुःस्वयमिंद्रःस्वयंशिवः स्वयंविश्वमिदंसर्वंस्व
स्मादन्यन्नकिंचन ८५ अंतःस्वयंचापिबहिःस्वयंचस्वयं
पुरस्तात्स्वयमेवपश्चात् स्वयंह्यवाच्यांस्वयमप्युदीच्यां
तथोपरिष्टात्स्वयमप्यधस्तात् ८६ तरंगफेनभ्रमबु
द्बुदादिसर्वंस्वरूपेणजलंयथातथा चिदेवदेहाद्यह
मंतमेतत्सर्वंचिदेवैकरसंविशुद्धं ८७ सदेवेदंसर्वंज
गदवगतंवाङ्मनसयोःसतोन्यन्नास्त्येवप्रकृतिपर

सोम्मिस्थितवत्तः पृथक्किं मृत्स्नायाः कलशघटकुंभाद्यव
गतंवदंतेषभ्रांतस्त्वमहमितिमायामदिरया ८८ क्रियास
मभिहारेणयत्रनान्यदितिश्रुतिः ब्रवीतिद्वैतराहित्यंमिथ्या
ध्यासनिवृत्तये ८९ आकाशवन्निर्मलनिर्विकल्पंनिःसीम
निःस्पंदननिर्विकारं अंतर्बहिःशून्यमनन्यमद्वयंस्वयंपरब्र
ह्मकिमस्तिबोध्यं ९० वक्तव्यंकिमुविद्यतेत्रबहुधाब्रह्मैवजी
वःस्वयंब्रह्मैतज्जगदापराणुसकलंब्रह्माद्वितीयंश्रुतेः ब्रह्मै
वाहमितिप्रबुद्धमतयःसंत्यक्तबाह्याःस्फुटं ब्रह्मीभूयवसंति
संततचिदानंदात्मनेवध्रुवं ९१ जहिमलमयकोशेहंधियोत्था
पिताशांप्रसभमनिलकल्पेलिंगदेहेपिपश्चात् निगमगदित
कीर्त्तिंनित्यमानंदमूर्त्तिंस्वयमितिपरिचीयब्रह्मरूपेणतिष्ठ ९२
शवाकारंयावद्भजतिमनुजस्तावदशुचिःपरेभ्यःस्यात्क्लेशा
ज्जननमरणव्याधिनिरयाः यदात्मानंशुद्धंकलयतिशिवाका
रमचलंतदातेभ्योमुक्तोभवतिहितदाहश्रुतिरपि ९३ स्वात्म
न्यारोपिताशेषाभासवस्तुनिरासतः स्वयमेवपरंब्रह्मपूर्ण
मद्वयमक्रियं ९४ समाहितायांसतिचित्तवृत्तौपरात्मनिब्र
ह्मणिनिर्विकल्पे नदृश्यतेकश्चिदयंविकल्पःप्रजल्पमा
त्रःपरिशिष्यतेततः ९५ असत्कल्पोविकल्पोयंविश्वमित्ये
कवस्तुनि निर्विकारेनिराकारेनिर्विशेषेभिदाकुतः ९६
द्रष्टादर्शनदृश्यादिभावशून्यैकवस्तुनि निर्विकारेनिराका
रेनिर्विशेषेभिदाकुतः ९७ कल्पार्णवइवात्यंतपरिपूर्णैक
वस्तुनि निर्विकारेनिराकारेनिर्विशेषेभिदाकुतः ९८ तेज
सीवतमोयत्रविलीनंभ्रांतिकारणं अद्वितीयेपरेतत्त्वेनिर्वि
शेषेभिदाकुतः ९९ एकात्मकेपरेतत्त्वेभेदकर्त्ताकथंवसेत् सु
षुप्तौसुखमात्रायांभेदःकेनावलोकितः ४०० नह्यस्ति

विश्वंपरतत्वबोधात्सदात्मनिब्रह्मणिनिर्विकल्पे कालत्रये
नाप्यहिरीक्षितोगुणेनद्वंबुविंदुर्मृगतृष्णिकायां १ मायामा
त्रमिदंद्वैतमद्वैतंपरमार्थतः इतिब्रूतेश्रुतिःसाक्षात्सुषुप्ताव
नुभूयते २ अनन्यत्वमधिष्ठानादारोप्यस्यनिरीक्षितं पंडितैर
ज्जुसर्पादौविकल्पोभ्रांतिजीवनः ३ चित्तमूलोविकल्पोयंचित्ता
भावेनकश्चन अतश्चित्तंसमाधेहिप्रत्यग्रूपेपरात्मनि ४ किम
पिसततबोधंकेवलानंदरूपंनिरुपममतिवेलंनित्यमुक्तंनिरी
हं निरवधिगगनाभंनिष्कलंनिर्विकल्पंहृदिकलयतिविद्वान्ब्र
ह्मपूर्णंसमाधौ ५ प्रकृतिविकृतिशून्यंभावनातीतभावंसम
रसमसमानंमानसंबंधदूरं निगमवचनसिद्धंनित्यमस्मत्प्रसिद्धं
हृदिकलयतिविद्वान्ब्रह्मपूर्णंसमाधौ ६ अजरममरमस्ताभा
ववस्तुस्वरूपंस्तिमितसलिलराशिप्रख्यमाख्याविहीनं शमि
तगुणविकारंशाश्वतंशांतमेकं हृदिकलयतिविद्वान्ब्रह्मपूर्णंस द
माधौ ७ समाहितांतःकरणःस्वरूपेविलोकयात्मानमखंडवै
भवं विच्छिंधिबंधंभवगंधगंधितंयत्नेनपुंस्त्वंसफलंकुरुष्व ८
सर्वोपाधिविनिर्मुक्तंसच्चिदानंदमद्वयं भावयात्मानमात्मस्थंन
भूयःकल्पसेध्वने ९ छायेवपुंसःपरिदृश्यमानमाभासरूपेणफ
लानुभूत्या शरीरमाराच्छववन्निरस्तंपुनर्नसंधानमिदंमहा
त्मा १० सततविमलबोधानंदरूपंसमेत्यत्यजजडमलरूपो
पाधिमेतंसुदूरे अथपुनरपिनैषस्मर्यतांवांतवस्तुस्मरणवि
षयभूतंकल्पतेकुत्सनाय ११ समूलमेतत्परिदह्यवह्नौसदा
त्मनिब्रह्मणिनिर्विकल्पे ततःस्वयंनित्यविशुद्धबोधानंदा
त्मनातिष्ठतिविद्वरिष्ठः १२ प्रारब्धसूत्रग्रथितंशरीरंप्रया
तुवातिष्ठतुगोरिवस्रक् नतत्पुनःपश्यतितत्त्ववेत्तानंदात्म
निब्रह्मणिलीनवृत्तिः १३ अखंडानंदमात्मानंविज्ञायस्वजन

नं

पतः चिमिछन्कस्यवाहेतोर्देहंपुस्णातितत्त्ववित् १४
संसिध्यस्यफलंत्वेतज्जीवन्मुक्तस्ययोगिनः बहिरंतः सदा
नंदरसास्वादनमात्मनि १५ वैराग्यस्यफलंबोधोबोधस्योप
रतः फलं स्वानंदानुभवाच्छांतिरेषैवोपरतेः फलं १६ यद्युत्तरो
त्तराभावपूर्वपूर्वंतुनिष्फलं निवृत्तिः परमातृप्तिरानंदोनुप
मस्वतः १७ दृष्टदुःखेष्वनुद्वेगोविद्यायाः प्रस्तुतंफलं यत्कृतं
भ्रांतिवेलायांनानाकर्मजुगुप्सितं पश्चान्नरोविवेकेनतत्कथं
कर्तुमर्हति १८ विद्याफलंस्यादसतोनिवृत्तिः प्रवृत्तिरज्ञानफ
लंतदीक्षितं तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौनोचेद्विदांदृष्टफलं
किमस्मात् १९ अज्ञानहृदयग्रंथिविनाशोयद्यशेषतः अनि
च्छोर्विषयः किंनुप्रवृत्तेःकारणंस्वतः २० वासनानुदयोभोग्ये
वैराग्यस्यतदावधिः अहंभावोदयाभावोबोधस्यपरमावधिः॥
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तुसा २१ ब्रह्माकारतयास
दास्थिततयानिर्मुक्तबाह्यार्थधीर्नान्यावेदितभोगभाग्यक
लनोनिद्रालुवद्बालवत् स्वप्नालोकितलोकवज्जगदिदंपश्यं
न्क्वचिल्लब्धधीरास्तेकश्चिदनंतपुण्यफलभुग्धन्यः समान्यो
भुवि २२ स्थितप्रज्ञोयतिरयंयः सदानंदमश्नुते ब्रह्मण्ये
वविलीनात्मानिर्विकारोविनिष्क्रियः २३ ब्रह्मात्मनोः शोधि
तयोरेकभावावगाहिनी निर्विकल्पाचचिन्मात्रावृत्तिः प्रज्ञे
तिकथ्यते २४ सासर्वदाभवेद्यस्यसजीवन्मुक्तउच्यते य
स्यस्थिताभवेत्प्रज्ञायस्यानंदोनिरंतरं प्रपंचोविस्मितप्रा
यः सजीवन्मुक्तइष्यते २५ लीनधीरपिजागर्तीयोजाग्रद्ध

मेवर्जितः बोधोनिर्वासनोयस्यसजीवन्मुक्तइष्यते २६ शा
तसंसारकलनः कलावानपिनिष्कलः यःसचित्तोपिनिश्चितः
सजीवन्मुक्त० २७ वर्त्तमानेपिदेहेस्मिन्छायावदनुवर्तिनि अ
हंताममताभावोजीवन्मुक्तस्यलक्षणं २८ अतीताननुसंधा
नंभविष्यदविचारणं औदासिन्यमपिप्राप्तेजीवन्मुक्तस्य २९
गुणदोषविशिष्टेस्मिन्स्वभावेनविलक्षणे सर्वत्रसमदर्शित्वंजी
वन्मु० ३० इष्टानिष्टार्थसंप्राप्तौसमदर्शितयात्मनि उभयत्रा
विकारित्वंजीवन्मुक्त० ३१ ब्रह्मानंदरसास्वादासक्तचित्ततया
यतेः अंतर्बहिरविज्ञानंजीवन्मुक्त० ३२ देहेंद्रियादौकर्तव्येम
माहंभाववर्जितः औदासिन्येनयस्तिष्ठेत्सजीवन्मुक्तइष्यते ३३
विज्ञातआत्मनोयस्यब्रह्मभावःश्रुतेर्बलात् भवबंधविनिर्मु
क्तःसजीवन्मुक्त० ३४ देहेंद्रियेष्वहंभावइदंभावस्तदन्यके
यस्यनोभवतःक्वापिसजीवन्० ३५ नप्रत्यग्ब्रह्मणोर्भेदंकदा
पिब्रह्मसर्गयोः प्रज्ञयायोविजानातिसजीवन्० ३६ साधुभिः
पूज्यमानेस्मिन्पीड्यमानेपिदुर्जनैः समभावोभवेद्यस्यसजी
वन्० ३७ यत्रप्रविष्टाविषयाःपरेरितानदीप्रवाहाइववारि
राशौ लीनंतिसन्मात्रतयानविक्रियामुत्पादयंत्येषयतिर्वि
मुक्तः ३८ विज्ञातब्रह्मतत्वस्ययथापूर्वंनसंसृतिः अस्तिचे
न्नसविज्ञातब्रह्मभावोबहिर्मुखः ३९ प्राचीनवासनावेगा
दसौसंसरतीतिचेत् नसदेकत्वविज्ञानान्मंदीभवतिवास
ना ४० अत्यंतकामुकस्यापिवृत्तिःकुंठतिमातरि तथैवब्र
ह्मविज्ञातेपूर्णानंदेमनीषिणः ४१ निदिध्यासनशीलस्यबा

घ्नत्स्यइक्ष्यते ब्रवीतिश्रुतिरेतस्यप्रारब्धंफलदर्शनात्
॥४२ सुखाद्यनुभवोयावत्तावत्प्रारब्धमिष्यते फलोदयःक्रि
यापूर्वोनिष्क्रियोनहिकुत्रचित् ४३ अहंब्रह्मेतिविज्ञानात्कल्प
कोटिशतार्जितं संचितंविलयंयातिप्रबोधात्स्वप्नकर्मवत् ४४
यत्कृतंस्वप्नवेलायांपुण्यंवापापमुल्बणं सुप्तोत्थितस्यकिं
तत्स्यात्स्वर्गायनरकायवा ४५ स्वमसंगमुदासीनंपरिज्ञायन
भोयथा नश्लिष्यतेयतिःकिंचित्कदाचिद्भाविकर्मभिः ४६
नभसोघटयोगेनसुरागंधेनलिप्यते तथात्मोपाधियोगेन
तद्धर्मैर्नैवलिप्यते ४७ ज्ञानोदयात्पुरारब्धंकर्मज्ञानान्नन
श्यति अदत्वास्वफलंलक्ष्यमुद्दिश्योत्सृष्टबाणवत् ४८
व्याघ्रबुध्याविनिर्मुक्तोबाणःपश्चात्तुगोमतौ नतिष्ठतिछि
नत्येवलक्ष्यंवेगेननिर्भरं ४९ प्रारब्धंबलवत्तरंखलुविदां
भोगेनतस्यक्षयःसम्यक्ज्ञानहुताशनेनविलयःप्राक्सं
चितागामिनां ब्रह्मात्मैक्यमवेक्ष्यतन्मयतयायेसर्वदा
संस्थितातेषांतत्रितयंनहिक्वचिदपिब्रह्मैवतेनिर्गुणं
॥५० उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनितिष्ठ
तोमुनेः प्रारब्धसद्भावकथानयुक्तास्वप्नार्थसंबंधकथे
वजाग्रतः ५१ नहिप्रबुधःप्रतिभासदेहेदेहोपयोगिन्यपि
चप्रपंचे करोत्यहंताममतामिदंतांकिंतुस्वयंतिष्ठतिजा
गरेण ५२ नतस्यमिथ्यार्थसमर्थनेच्छानसंग्रहस्तज्जग
तोपिदृष्टः तत्रानुवृत्तिर्यदिचेन्मृषार्थेननिद्रयामुक्तइ
तीष्यतेध्रुवं ५३ तद्वत्परेब्रह्मणिवर्तमानःसदात्म
नातिष्ठतिनान्यदीक्षते स्मृतिर्यथास्वप्नविलोकितार्थे

तथाविदः प्राशनभोजनादौ ५४ कर्मणानिर्मितोदेहः प्रा
रब्धंतस्यकल्प्यतां नानादेरात्मनोयुक्तंनैवात्माकर्मनि
र्मितः ५५ अजोनित्यःशाश्वतइतिब्रूतेश्रुतिरमोघवा
क् तदात्मनातिष्ठतोस्यकुतःप्रारब्धकल्पना ५६ प्रारब्धं
सिध्यतितदायदादेहात्मनास्थितिः देहात्मभावोनैवेष्टः
प्रारब्धंत्यज्यतामतः ५७ प्रारब्धकल्पनाप्यस्यदेहस्य
भ्रांतिरेवहि अध्यस्तस्यकुतःसत्वमसत्यस्यकुतोजनिः॥
॥५८ अजातस्यकुतोनाशःप्रारब्धमसतः कुतः ज्ञानेन
ज्ञानकार्यस्यसमूलस्यलयोयदि ५९ तिष्ठत्ययंकथंदे
हइतिशंकावतोजडान् समाधातुंबाह्यदृष्ट्याप्रारब्धं
वदतिश्रुतिः नतुदेहादिसत्यत्वंबोधनायविपश्चितां ६०
परिपूर्णमनाद्यंतमप्रमेयमविक्रियं एकमेवाद्वयंब्रह्मने
हनानास्तिकिंचन ६१ सद्घनंचिद्घनंनित्यमानंदघनम
क्रियं एकमेवाद्वयंब्रह्मनेह० ६२ प्रत्यगेकरसंपूर्णम
नंतंसर्वतोमुखं एक० ६३ अहेयमनुपादेयमनाधे
यमनाश्रयं एक० ६४ निर्गुणंनिष्कलंसूक्ष्मंनिर्विक
ल्पंनिरंजनं एक० ६५ अनिरूप्यस्वरूपंयन्मनोवाचा
मगोचरं एक० ६६ सत्समृद्धंस्वतःसिद्धंशुद्धंबुद्धमनी
दृशं एक० ६७ निरस्तरागानिरपास्तभोगाः शांताः
सुदांतायतयोमहांतः विज्ञायतत्वंपरमेतदंतेप्राप्ताः
परांनिर्वृतिमात्मयोगात् ६८ भवानपीदंपरतत्वमा
त्मनःस्वरूपमानंदघनंविचार्य विधूयमोहंस्वमनः
प्रकल्पितंमुक्तःकृतार्थोभवतुप्रबुद्धः ६९ समाधि

ORIENTAL INSTITUTE
Tilak Road, Post Box No. 75,
BAROD.

समाधिनासाधुविनिश्चितात्मनापश्यात्मतत्वंस्फुटबो
धचक्षुषा निःसंशयंसम्यगवेक्षितश्चेछ्रुतःपदार्थोन
पुनर्विकल्पिते ७० स्वस्याविद्याबंधसंबंधमोक्षात्स
त्यज्ञानानंदरूपात्मसिंधौ शास्त्रंयुक्तिर्बोधकोक्तिःप्रमा
णंचांतःसिद्धास्वानुभूतिःप्रमाणं ७१ बंधोमोक्षश्चतृ
प्तिश्चचिंतारोग्यक्षुधादयः स्वेनैववेद्यायज्ज्ञानंपरेषामा
नुमानिकं ७२ तटस्थिताबोधयंतिगुरवःश्रुतयोयथा
प्रज्ञयैवतरेद्विद्वानीश्वरानुगृहीतया ७३ स्वानुभूत्यास्व
यंज्ञात्वास्वमात्मानमखंडितं संसिद्धःसंमुखंतिष्ठेन्निर्वि
कल्पात्मनात्मनि ७४ वेदांतसिद्धांतनिरुक्तिरेषाब्रह्मैवजी
वःसकलंजगच्च अखंडरूपस्थितिरेवमोक्षोब्रह्माद्वितीये
श्रुतयःप्रमाणं ७५ इतिगुरुवचनाछ्रुतिप्रमाणात्परमव
गम्यसतत्वमात्मयुक्त्या प्रशमितकरणःसमाहिता
त्माक्वचिदचलाकृतिरात्मनिष्ठितोभूत् ७६ किंचित्कालं
समाधायपरब्रह्मणिमानसं व्युत्थायपरमानंदादिदंव
चनमब्रवीत् ७७ बुद्धिर्विनष्टागलिताप्रवृत्तिर्ब्रह्मात्म
नोरेकतयाधिगत्या इदंनजानेप्यनिदंनजानेकिंवाकिय
द्वासुखमस्त्यपारं ७८ वाचावक्तुमशक्यमेवमनसा
मंतुंनवास्वाद्यतेस्वानंदामृतपूरपूरितपरब्रह्मांबुधेर्वै
भवं अंभोराशिविशीर्णवार्षिकशिलाभावंभजन्मेम
नोयस्यांशांशलवेविलीनमधुनानंदात्मनानिर्वृतं ७९
क्वगतंकेनवानीतंकुत्रलीनमिदंजगत् अधुनैवमया
दृष्टंनास्तिकिंमहदद्भुतं ८० किंहेयंकिमुपादेयंकिं

मव्यक्तंकिंविलक्षणं अखंडानंदपीयूषपूर्णेब्रह्ममहार्णवे
॥८१ नकिंचिदत्रपश्यामिनशृणोमिनवेद्म्यहं स्वात्मनैवसदा
नंदरूपेणास्मिंस्वलक्षणं ८२ नमोनमस्तेगुरवेमहात्मनेविमु
क्तसंगायसदुत्तमाय नित्याद्वयानंदरसस्वरूपिणेभूम्नेसदा
पारदयांबुधाम्ने ८३ यत्कटाक्षशशिसांद्रचंद्रिकापातधूतभ
वतापजश्रमः प्राप्तवानहमखंडवैभवानंदमात्मपदमक्षयं
क्षणात् ८४ धन्योहंकृतकृत्योहंविमुक्तोहंभवग्रहात् नित्या
नंदस्वरूपोहंपूर्णोहंत्वदनुग्रहात् ८५ असंगोहमनंगोहम
लिंगोहमहंगुरुः प्रशांतोहमनंतोहममलोहंचिरंतनः ८६ अ
कर्त्ताहमभोक्ताहमविकारोहमक्रियः शुद्धबोधस्वरूपोहंके
वलोहंसदाशिवः ८७ द्रष्टुःश्रोतुर्वक्तुःकर्तुर्भोक्तुर्विभिन्नएवा
हं नित्यनिरंतरनिष्क्रियनिःसीमासंगपूर्णबोधात्मा ८८ ना
हमिदंनाहमदोप्युभयोरवभासकंपरंशुद्धं बाह्याभ्यंतरशून्
न्यंपूर्णंब्रह्माद्वितीयमेवाहं ८९ निरुपममनादितत्त्वंत्वमहं
मिदमदइतिकल्पनादूरं नित्यानंदैकरसंसत्यंब्रह्माद्विती
यमेवाहं ९० नारायणोहंनरकांतकोहंपुरांतकोहंपुरुषो
हमीशः अखंडबोधोहमशेषसाक्षीनिरीश्वरोहंनिरहं
चनिर्ममः ९१ सर्वेषुभूतेष्वहमेवसंस्थितोज्ञानात्मनांत
र्बहिराश्रयःसन् भोक्ताचभोग्यंस्वयमेवसर्वंयद्यत्पृथ
ग्दृष्टमिदंतयापुरा ९२ मय्यखंडसुखांभोधौबहुधावि
श्ववीचयः उत्पद्यंतेविलीयंतेमायामारुतविभ्रमात् ९३
स्थूलादिभावामयिकल्पिताभ्रमादारोपितानुस्फुरणेन
लोकैः कालेयथाकल्पकवत्सरायर्त्वादयोनिष्कलनिर्वि

कल्पे २४ आरोपितं नाश्रयदूषणं भवेत्कदापि मूढैर्मति
दोषदूषितैः नार्द्रीकरोत्यूषरभूमिभागं मरीचिकावारि
महाप्रवाहः २५ आकाशवत्कल्पविदूरगोहं आदित्यवद्भा
स्यविलक्षणोहं आहार्यवन्नित्यविनिश्चलोहं अंभोधिव
त्पारविवर्जितोहं २६ नमे देहेन संबंधो मेघेनेव विहाय
सः अतः कुतो मे तद्धर्मा जाग्रत्स्वप्नसुषुप्तिषु २७ उपा
धिरायाति स एव गच्छति स एव कर्माणि करोति भुंक्ते स ए
व जीर्यन्म्रियते सदाहं कुलाद्रिवन्निश्चल एव संस्थितः २८
नमे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य ए
कात्मको यो निबिडो निरंतरो व्योमेव पूर्णः स कथं विचेष्टते
॥२९ पुण्यानि पापानि निरिंद्रियस्य निश्चेतसो निर्विकृते
र्निराकृतेः कुतो ममाखंडसुखानुभूतेर्ब्रूते ह्यनन्वागतमि
त्यपि श्रुतिः ५०० छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दु
ष्टुं ष्टु वा न स्पृशत्येव किंचित्पुरुषं तद्विलक्षणं १ न साक्षिणं
साक्ष्यधर्माः संस्पृशंति विलक्षणं अविकारमुदासीनं
गृहधर्माः प्रदीपवत् २ रवेर्यथा कर्मसाक्षिस्वभावो वह्ने
र्यथा दाहनियामकत्वं रज्जोर्यथारोपितवस्तुसंगस्त
थैव कूटस्थचिदात्मनो मे ३ कर्तापि वा कारयितापि नाहं
भोक्तापि वा भोजयितापि नाहं सोहं स्वयंज्योतिरनीदृगा
त्मा ४ चलत्युपाधौ प्रतिबिंबलौल्यमौपाधिकं मूढधि
यो नयंति तं बिंबभूतं रविवद्विनिष्क्रियं कर्तास्मि भोक्ता ष्क्रि
स्मि हतोस्मि हेति ५ जलेन वापि स्थलेवापि लुठत्वेष ज

४ द्रष्टापि वा दर्शयितापि नाहं ४

ज्ञात्मकः नाहंविलिप्येतद्धर्मैर्घटधर्मैर्नभोयथा ६ कर्तृ
त्वभोक्तृत्वखलुत्वसत्वजडत्वबद्धत्वविमुक्ततादयः बुद्धे
र्विकल्पान्नतुसंतिवस्तुतः स्वस्मिन्परेब्रह्मणिकेवलाद्
ये ७ संतुविकाराः प्रकृतेर्दशधाशतधासहस्रधावा
पि तैः किमसंगचित्तेर्नह्यंबुदछटांबरमंबरंस्पृशति ८ अ
व्यक्तादिस्थूलपर्यंतमेतद्विश्वंयत्राभासमात्रंप्रतीतं व्योम
प्रख्यंसूक्ष्ममाद्यंतहीनंब्रह्माद्वैतंयत्तदेवाहमस्मि ९ स्व
स्मिन्नस्ताशेषमायाविशेषंप्रत्यग्रूपंप्रत्ययागम्यमानं सत्यं
ज्ञानानंतमानंदरूपंब्रह्माद्वैतंयत्तदेवाहमस्मि १० सर्वाधारं
सर्ववस्तुप्रकाशंसर्वाकारंसर्वगंसर्वशून्यं नित्यंशुद्धंनिर्म
लंनिर्विकल्पंब्रह्माद्वैतंयत्तदेवाहमस्मि ११ निष्क्रियोस्म्यवि
कारोस्मिनिष्कलोस्मिनिराकृतिः निर्विकल्पोस्मिनित्योस्मि
निरालंबोस्मिनिर्द्वयः १२ सर्वात्मकोहंसर्वोहंसर्वातीतोह
मद्वयः केवलाखंडबोधोहंस्वानंदोहंनिरंतरः १३ स्वारा
ज्यसाम्राज्यविभूतिरेषाभवत्कृपाश्रीमहतःप्रसादात्
प्राप्तामयाश्रीगुरवेमहात्मनेनमोनमस्तेस्तुपुनर्नमोस्तु॥
॥१४ स्वपंतंमायाभिःकृतजनिजरामृत्युगहनेभ्रमंतंक्लिश्यं
तंबहुलतरतापैरनुकुलं अहंकारग्रहव्यथितमिममसत
कृपयाप्रबोध्यप्रस्वापात्परमवितवान्मामसिगुरो १५ नम
स्तस्मैसदैकस्मैनमश्चिन्मानसंमुक्तः यदेतद्विश्वरूपेण
राजतेगुरुराजते १६ इतिनतमवलोक्यशिष्यवर्यंसमधि
गतात्मस्वरूपंप्रबुद्धतत्वं प्रमुदितहृदयः सद्देशिकेंद्रः
पुनरिदमाहवचः परंमहात्मा १७ ब्रह्मप्रत्ययसंतति

जगदिदंब्रह्मैवसत्सर्वतः पश्याध्यात्मदृशाप्रशांतमनसासा
र्वास्ववस्थास्वपि रूपादन्यदवेक्षितुंकिमभितश्चक्षुष्मतांविद्यते
तद्वद्ब्रह्मविदःसतःकिमपरंबुद्धेर्विहारास्पदं १८ कस्तांपरानंद
रसानुभूतिमुत्सृज्यशून्येषुरमेतविद्वान्चंद्रेमहाह्लादिनिदीप्य
मानेचित्रेंदुमालोकयितुंकइच्छेत् १९ असत्पदार्थानुभवेनकिं
चि[illegible]ह्यस्तितृप्तिर्नचदुःखहानिः तदद्वयानंदरसानुभूत्यातृप्तः
सुखंतिष्ठसदात्मनिष्ठया २० स्वमेवसर्वतःपश्यन्मन्यमानःस्व
मद्वयं स्वानंदमनुभुंजानःकालंनयमहामते २१ अखंडबोधा
त्मनिनिर्विकल्पेविकल्पनंव्योम्निपुरःप्रकल्पनं तदद्वयानंदमया
त्मनासदाशांतिंपरामेत्यभजस्वमौनं २२ तूष्णीमवस्थापरमोप
शांतिर्बुद्धेरसत्कल्पविकल्पहेतोः ब्रह्मात्मनाब्रह्मविदोमहात्म
नोयत्राद्वयानंदसुखंनिरंतरं २३ नास्तिनिर्वासनान्मौनात्परं
सुखकृदुत्तमं विज्ञातात्मस्वरूपस्यस्वानंदरसपायिनः २४ ग
च्छंस्तिष्ठन्नुपविशन्शयानोवान्यथापिवा यथेष्टयावसेद्विद्वाना
त्मारामःसदामुनिः २५ नदेशकालासनदिग्यमादिलक्ष्याद्यपेक्षा
प्रतिबद्धवृत्तेः संसिद्धतत्वस्यमहात्मनोस्तिस्ववेदनेकानियमा
द्यवस्था २६ घटोयमितिविज्ञातुंनियमःकोन्वपेक्षते विनाप्रमा
णसुष्ठुत्वंयस्मिन्सतिपदार्थधीः २७ अयमात्मानित्यसिद्धःप्र
माणेसतिभासते नदेशंनापिवाकालंनशुद्धिंवाप्यपेक्षते २८
देवदत्तोयमित्येतद्विज्ञानंनिरपेक्षकं तद्वद्ब्रह्मविदोप्यस्यब्रह्मा
हमितिकेवलं २९ भानुनेवजगत्सर्वंभास्यतेयेनतेजसा अनात्म
कमसत्तुच्छंकिंनुतस्यावभासकं ३० वेदशास्त्रपुराणानिभूतानि
सकलान्यपि येनार्थवंतितंकिंनुविज्ञातारंप्रकाशयेत् ३१ एषः
स्वयंज्योतिरनंतशक्तिरात्माप्रमेयःसकलानुभूतिः यमेवविज्ञा
यविमुक्तबंधोजयत्ययंब्रह्मविदुत्तमोत्तमः ३२ नखिद्यतेनोवि

षयेः प्रमोदतेनसज्यतेनापिविरज्यतेच स्वस्मिन्सदाक्री
डतिनंदतिस्वयंनिरंतरानंदरसेनतृप्तः ३३ क्षुधांदेहव्य
थांत्यक्त्वाबालः क्रीडतिवस्तुनि तथैवविद्वान्रमतेनिर्म
मोनिरहंसुखी ३४ चिंताशून्यमदैन्यभैक्षमशनंपानं
सरिद्वारिषुस्वातंत्र्येणनिरंकुशास्थितिरभीर्निद्राश्मशा
नेवने वस्त्रक्षालनशोषणादिरहितंदिग्वास्तुसर्वाम
हीसंचारोनिगमांतवीथिषुविदांक्रीडापरेब्रह्मणि ३५
विमानमालंब्यशरीरमेतद्भुनक्त्यशेषान्विषयानुपस्थि
तान् परेच्छयाबालवदात्मवेत्तायोव्यक्तलिंगानुसक्त
बाह्यः ३६ दिगंबरोवापिचसांबरोवात्वगंबरोवापिचि
दंबरोवा उन्मत्तवद्वापिचबालवद्वापिशाचवद्वापिचर
त्यवन्यां ३७ कामीनिष्कामरूपीसंश्चरत्येकचरोमुनिः
स्वात्मनैवसदातुष्टः स्वयंसर्वात्मनास्थितः ३८ क्वचिन्मूढो
विद्वान्क्वचिदपिमहाराजविभवः क्वचिद्भ्रांतः सौम्यः क्व
चिदजगराचारकलितः क्वचित्पात्रीभूतः क्वचिदवमतः
क्वाप्यविदितश्चरत्येवंप्राज्ञः सततपरमानंदसुखितः ३९
निर्धनोपिसदातुष्टोप्यसहायोमहाबलः नित्यतृप्तोप्य
भुंजानोप्यसमः समदर्शनः ४० अपिकुर्वन्नकर्माणि
चाभोक्ताफलभोग्यपि शरीर्यप्यशरीर्येषपरिच्छिन्नो
पिसर्वगः ४१ अशरीरंसदासंतमिमंब्रह्मविदंक्वचि
त् प्रियाप्रियेनस्पृशतस्तथैवचशुभाशुभे ४२ स्थू
लादिसंबंधवतोभिमानिनः सुखंचदुःखंचशुभाशु
भेच विध्वस्तबंधस्यसदात्मनोमुनेः कुतः शुभंवाप्य
शुभंफलंवा ४३ तमसायस्तवद्भानादग्रस्तोपिरवि

च

जनैः ग्रस्तस्तरकथ्यतेभ्रांत्याह्यज्ञात्वावस्तुलक्षणं ४४ तद्व
देहादिबंधेभ्योविमुक्तंब्रह्मवित्तमं पश्यंतिदेहिवन्मूढाः
शरीराभासदर्शनात् ४५ अहिर्निर्ल्वयंनिर्वायमुक्तदेहस्तु
तिष्ठति इतस्ततश्चाल्यमानोयत्किंचित्प्राणवायुना ४६
स्त्रोतसानीयतेदारुयथानिम्नोन्नतस्थलं दैवेननीयतेदे
होयथाकालोपभुक्तिषु ४७ प्रारब्धकर्मकल्पितवासनाभिः
संसारिवच्चरतिभुक्तिषुमुक्तदेहः सिद्धस्वयंवसतिसाक्षिव
दत्रतूष्णींचक्रस्यमूलमिवकल्पविकल्पशून्यः ४८ नैवेंद्रि
याणिविषयेषुनियुंक्तएषनैवापयुंक्तउपदर्शनलक्षणस्थः॥
नैवक्रियाफलमपीषदवेक्षतेषः स्वानंदसांद्ररसपानसु
मत्तचित्तः ४९ लक्ष्यालक्ष्यमतित्यक्त्वायस्तिष्ठेत्केवलात्म
ना शिवएवस्वयंसाक्षादयंब्रह्मविदुत्तमः ५० जीवन्नेव
सदामुक्तः कृतार्थोब्रह्मवित्तमः उपाधिनाशाद्ब्रह्मैव
सन्ब्रह्माप्येतिनिर्द्वयं ५१ शैलूषोवेषसद्भावाभावयो
श्चयथापुमान् तथैवब्रह्मविछ्रेष्ठः सदाब्रह्मैवनाप
रः ५२ यत्रक्वापिविशीर्णंसत्पर्णमिवतरोर्वपुः पतनात्॥
ब्रह्मीभूतस्ययतेः प्रागेवतच्चिदाग्निनादग्धं ५३ सदा
त्मनिब्रह्मणितिष्ठतोमुनेः पूर्णद्वयानंदमयात्मनासदा॥
नदेशकालाद्युचितप्रतीक्षात्वङ्मांसविट्पिंडविसर्ज
नाय ५४ देहस्यमोक्षोनोमोक्षोनदंडस्यकमंडलोः अ
विद्याहृदयग्रंथिमोक्षोमोक्षोयतस्ततः ५५ कुल्याया
मथनद्यांवाशिवक्षेत्रेपिचत्वरे पर्णंपततिचेत्तेनतरोः
किंनुशुभाशुभं ५६ पत्रस्यपुष्पस्यफलस्यनाशवद्दे
हेंद्रियप्राणधियांविनाशः नैवात्मनः स्वस्यसदात्मक
स्यानंदाकृतेर्वृक्षवदस्तिएषः ५७ प्रज्ञानघनइत्यात्मा

लक्षणंसत्यसूचकं अनूद्योपाधिकस्यैवकथयंतिविनाशनं ५८
अविनाशीवाअरेयमात्मेतिश्रुतिरात्मनः प्रब्रवीत्यविनाशित्वं
विनश्यत्सुविकारिषु ५९ पाषाणवृक्षतृणधान्यघटांबराद्याद्
ग्धाभवंतिहिमृदेवयथातथैव देहेंद्रियासुमनआदिसमस्तदृश्यं
ज्ञानाग्निदग्धमुपयातिपरात्मभावं ६० विलक्षणंयथाध्वांतंली
यतेभानुतेजसि तथैवसकलंदृश्यंब्रह्मणिप्रविलीयते ६१ घ
टेनष्टेयथाव्योमव्योमैवभवतिस्फुटं तथैवोपाधिविलयेब्रह्मै
वब्रह्मवित्स्वयं ६२ क्षीरंक्षीरेयथाक्षिप्तंतैलंतैलेजलंजले संयुक्त
मेकतांयातितथात्मन्यात्मविन्मुनिः ६३ एवंविदेहकैवल्यंसन्मात्र
त्वमखंडितं ब्रह्मभावंप्रपद्यैषयतिर्नावर्त्ततेपुनः ६४ सदात्मैकत्व
विज्ञानदग्धाविद्यादिवर्ष्मणः अमुष्यब्रह्मभूतत्वात्ब्रह्मणःकु
तउद्भवः ६५ मायाक्लृप्तौबंधमोक्षौनस्तःस्वात्मनिवस्तुतः यथा
क्रि रज्जौनिष्क्रियायांसर्पाभासविनिर्गमौ ६६ आवृत्तेःसदसत्वाभ्यां
वक्तव्येबंधमोक्षणे नावृत्तिर्ब्रह्मणःकाचिदन्याभावादनावृतं ६७
यद्यस्त्यद्वैतहानिःस्याद्द्वैतंनोसहते श्रुतिः बंधश्चमोक्षश्चमृषैवमू
ढाबुद्धेर्गुणंवस्तुनिकल्पयंति दृगावृतिंमेघकृतांरवौयथायतोऽ
यासंगचिदेतदक्षरं ६८ अस्तीतिप्रत्ययोयश्चयश्चनास्तीतिवस्तु
नि बुद्धेरेवगुणावेतौनतुनित्यस्यवस्तुनः ६९ अतस्तौमाययाक्लृ
प्तौबंधमोक्षौनचात्मनि निष्कलेनिष्क्रियेशांतेनिरवद्येनिरंजने ७०
अद्वितीयेपरेतत्वेव्योमवत्कल्पनाकुतः ननिरोधोनचोत्पत्तिर्नब
द्धोनचसाधकः नमुमुक्षुर्नवैमुक्तःइत्येषापरमार्थता ७१ सकल
निगमचूडास्वांतसिद्धांतगुह्यंपरमिदमतिगुह्यंदर्शितंतेमयाद्य॥
अपगतकलिदोषंकामनिर्मुक्तबुद्धिंतमनुवदस्वच्छत्वाभावयित्वा
मुमुक्षुं ७२ इतिश्रुत्वागुरोर्वाक्यंप्रश्रयेणकृतानतिः सतेनसम
नुज्ञातोययौनिर्मुक्तबंधनः ७३ गुरुरेषसदानंदसिंधौनिमग्न
मानसः पावयन्वसुधांसर्वांविचचारनिरंतरं ७४ इत्याचार्य

ORIENTAL INSTITUTE
Tilak Road, Post Box No. 75,
BARODA.

स्यशिष्यस्यसंवादेनात्मलक्षणं निरूपितंमुमुक्षूणांसुखबोधो
पपत्तये ७५ हितमिममुपदेशमाद्रियंतांविहितनिरस्तसम
स्तचित्तदोषाः भवसुखविरलाःप्रशांतचित्ताःश्रुतिरसिका
यतयोमुमुक्षवोये ७६ संसाराध्वनितापभानुकिरणप्रोद्भूत
दाहव्यथाखिंनानांजलकांक्षयामरुभुविभ्रांत्यापरिभ्राम्यतां॥
अत्यासन्नसुधांबुधिंसुखकरंब्रह्माद्वयंदर्शयंत्येषाशंकरभा
रतीविजयतेनिर्वाणसंधायिनी ७७ ५७७ इतिश्रीगोविं
दभगवत्पादपूज्यशिष्यश्रीशंकरभगवत्पादकृतात्मानात्मवि
वेकचूडामण्याख्यंप्रकरणंसमाप्तं शुभंभवतु
निरसबाधपरिपीडितंजगद्विश्वमंतुद्दलिवाक्यज्यामतिः
वासुदेवनिहितंधनंजयोहंतिकौरवकुलंयथाधुनः श्रीशं
करानंदगुरुप्रसन्नः श्रीसर्वेश्वरार्पणमस्तु श्रीपुरुषोत्तमार्प
णमस्तु श्रीसप्तशृंगनिवासिन्यार्पणमस्तु श्रीयज्ञनारायण
शाके१७८७पार्थिवाब्देवैशाखशुक्ल१२भृगौतद्दिनेपुस्तकंसंपूर्णं

श्रीमंत रा. रा. शंकरराव गंगाधर
बडोदें
शास्त्री पटवर्धन